ॐ मनसः काममाकूतिं व्वाचः सत्यमशीय ।। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।।

प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट् ।
भगवाञ्छाश्वतो नित्यं नो वै रक्षन्तु सर्वतः ।।
ॐ भगवान् प्रजापतिः प्रीयताम् ।। १ ।।

ॐ प्रजापते न त्वदेतान्न्यन्न्यो व्विश्श्वा रूपाणि परि ता बभूव ।। यत्कामास्ते जुहुमस्तन्नो ऽअस्त्वयममुष्य पितासावस्य पिता व्वयꣳ स्याम पतयो रयीणाꣳ स्वाहा ।।

आयुष्मते स्वस्तिमते यजमानाय दाशुषे ।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः ।।

इति यजमानः ।। ॐ आयुष्मते स्वस्ति, इति ब्राह्मणाः ।।१।।

ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।। येन व्विश्श्वाः परि द्विषो व्वृणक्ति व्विन्दते व्वसु ।।

ॐ स्वस्तिवाचनसमृद्धिरस्तु ।। कृतस्य स्वस्तिवाचनकर्मणः समृद्ध्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य दातुमहमुत्सृजे ।।

* अथ मातृका-पूजनम् *

अथाऽऽग्नेय्यां प्रतिमास्वक्षतपुञ्जेषु वा प्राक्संस्थमुदक्संस्थं वा पीठोपरि मातृस्थापनम् । तद्यथा—

समीपे मातृवर्गस्य सर्वविघ्नहरं सदा ।
त्रैलोक्यवन्दितं देवं गणेशं स्थापयाम्यहम् ।।

ॐ गणानां त्वा गणपतिठँ हवामहे प्प्रियाणां त्वा प्प्रियपतिठँ हवामहे निधीनान्त्वा निधिपतिठँ हवामहे व्वसो मम ॥ आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ।

ॐ भूर्भुवः स्वः गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥१॥

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ॥

ॐ आयङ्गौः पृश्निरक्रमोदसदन्मातरम्पुरः ॥ पितरञ्च प्प्रयन्त्स्वः ॥

ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि ॥२॥

पद्माभां पद्मवदनां पद्मनाभोरुसंस्थिताम् ।
जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहम् ।

ॐ हिरण्यरूपा ऽउषसो व्विरोक ऽउभाविन्द्रा ऽउदिथः सूर्य्यश्च ॥ आरोहतं व्वरुण मित्त्र गर्तं ततश्चक्षाथामदितिं दितिञ्च मित्त्रोऽसि व्वरुणोऽसि ॥

ॐ पद्मायै नमः पद्मामावाहयामि स्थापयामि ॥ ३ ॥

दिव्यरूपां विशालाक्षीं शुचिकुण्डलधारिणीम् ।
रक्तमुक्ताद्यलङ्कारां शचीमावाहयाम्यहम् ॥

ॐ निवेशनः सङ्गमनो व्वसूनां व्विश्श्वा रूपाभिचष्ट्टे शचीभिः ॥ देव ऽइव सविता सत्यधर्म्मेन्द्रो न तस्त्थौ समरे पथीनाम् ॥

ॐ शच्यै नमः शचीमावाहयामि स्थापयामि ॥ ४ ॥

विश्वेऽस्मिन् भूरिवरदां जरां निर्जरसेविताम् ।
बुद्धिप्रबोधिनीं सौम्यां मेधामावाहयाम्यहम् ॥

ॐ मेधाम्मे व्वरुणो ददातु मेधामग्निः प्प्रजापतिः ॥ मेधामिन्द्रश्श्च व्वायुश्श्च मेधान्धाता ददातु मे स्वाहा ॥

ॐ मेधायै नमः मेधामावाहयामि स्थापयामि ॥ ५ ॥

जगत्सृष्टिकरीं धात्रीं देवीं प्रणवमातृकाम् ।
वेदगर्भां यज्ञमयीं सावित्रीं स्थापयाम्यहम् ॥

ॐ सविता त्त्वा सवानाꣳ सुवतामग्निर्ग्गृहपतीनाꣳ सोमो व्वनस्प्पतीनाम् ॥ बृहस्पतिर्व्वाचि ऽइन्द्रो ज्ज्यैष्ठ्याय रुद्द्रः पशुब्भ्यो मित्त्रः सत्यो व्वरुणो धर्म्मपतीनाम् ॥

ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि ॥ ६ ॥

सर्वास्त्राधारिणीं देवीं सर्वाभरणभूषिताम् ।
सर्वदेवस्तुतां वन्द्यां विजयां स्थापयाम्यहम् ॥

ॐ व्विज्ज्यन्धनुः कपर्दिनो व्विशल्यो बाणवाँ२ उत ॥ अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः ॥

ॐ विजयायै नमः विजयामावाहयामि स्थापयामि ॥७॥

सुरारिमथिनीं देवीं देवानामभयप्रदाम् ।
त्रैलोक्यवन्दितां शुभ्रां जयामावाहयाम्यहम् ॥

ॐ बह्वीनाम्पिता बहुरस्य पुत्त्रश्शिचश्श्चाकृणोति समनावगत्य । इषुधिः सङ्काः पृतनाश्च्च सर्वाः पृष्ठे निनद्धो जयति प्प्रसूतः ॥

ॐ जयायै नमः जयामावाहयामि स्थापयामि ॥ ८ ॥

मयूरवाहनां देवीं खड्गशक्तिधनुर्धराम् ।
आवाहयेद्देवसेनां तारकासुरमर्द्दिनीम् ॥

ॐ इन्द्र ऽआसान्नेता वृहस्पतिर्द्दक्षिणा यज्ञः पुर एतु

सोमः ।। देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्ग्रम् ।।

ॐ देवसेनायै नमः देवसेनामावाहयामि स्थापयामि ।। ९ ।।

अग्रजा सर्वदेवानां कव्यार्थं या प्रतिष्ठिता ।
पितृणां तृप्तिदां देवीं स्वधामावाहयाम्यहम् ।।

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ।। अक्षन्निपतरोऽमीमदन्त पितरोऽतीतृपन्न्त पितरः पितरः शुन्धद्ध्वम् ।।

ॐ स्वधायै नमः स्वधामावाहयामि स्थापयामि ।। १० ।।

हविर्गृहीत्वा सततं देवेभ्यो या प्रयच्छति ।
तां दिव्यरूपां वरदां स्वाहामावाहयाम्यहम् ।।

ॐ स्वाहा प्प्राणेभ्यः साधिपतिकेभ्यः ।। पृथिव्व्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा व्वायवे स्वाहा ।। दिवे स्वाहा सूर्य्याय स्वाहा ।।

ॐ स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ।।११।।

आवाहयाम्यहं मातॄः सकलाः लोकपूजिताः ।।
सर्वकल्याणरूपिण्यो वरदा दिव्यभूषणाः ।।

ॐ आपो ऽअस्मान्न्मातरः शुन्धयन्तु धृतेन नो घृतप्प्वः पुनन्तु ।। व्विश्श्वठं हि रिप्प्रम्प्रहवन्ति देवीरुदिदाभ्यः शुचिरा पूत ऽएमि ।। दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्ग्माम्परिदधे भद्द्रं व्वर्णं पुष्ष्यन् ।।

ॐ मातृभ्यो नमः मातॄः आवाहयामि स्थापयामि ।।१२।।

आवाहयेल्लोकमातॄर्जयन्तीप्रमुखाः शुभाः ।
नानाऽभीष्टप्रदाः शान्ताः सर्वलोकहितावहाः ।।

ॐ रयिश्च्च मे रायश्च्च मे पुष्टञ्च मे पुष्टिश्च्च मे व्विभु च मे प्रभु च मे पूर्ण्णञ्च मे पूर्ण्णतरञ्च मे कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्प्पन्ताम् ।।

ॐ लोकमातृभ्यो नमः लोकमातृः आवाहयामि स्थापयामि ।। १३ ।।

सर्वहर्षकरीं देवीं भक्तामभयप्रदाम् ।
हर्षोत्फुल्लास्यकमलां धृतिमावाहयाम्यहम् ।।

ॐ यत्प्रज्ञानमुत चेतो धृतिश्च्च यज्ज्योतिरन्तरमृतं प्प्रजासु ।। यस्मान्न ऽऋते किञ्च न कर्म्म क्क्रियते तन्न्मे मनः शिवङ्कल्प्पमस्तु ।।

ॐ धृत्यै नमः धृतिमावाहयामि स्थापयामि ।। १४ ।।

पोषयन्तीं जगत्सर्वं स्वदेहप्रभवैर्न्नवैः ।
शाकैः फलैर्जलै रत्नैः पुष्टिमावाहयाम्यहम् ।।

ॐ अङ्गान्यात्मन्न्भिषजा तदश्श्विनात्मानमङ्गैः समधात्त्सरस्वती ।। इन्द्रस्य रूपꣳ शतमानमायुश्च्चन्द्रेण ज्ज्योतिरमृतं दधानाः ।।

ॐ पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि ।। १५ ।।

देवैराराधितां देवीं सदा सन्तोषकारिणीम् ।
प्रसादसुमुखीं देवीं तुष्टिमावाहयाम्यहम् ।।

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहातिवेदः ।
सनः पर्षदतिदुर्ग्गाणि विश्वा नावेव सिन्धुन्दुरितात्यग्निः ।।

ॐ तुष्ट्यै नमः तुष्टिमावाहयामि स्थापयामि ।। १६ ।।

पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम् ।।

ॐ प्राणाय स्वाहा ऽपानाय स्वाहा व्यानाय स्वाहा ।। चक्षुषे स्वाहा श्रोत्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा ।।

ॐ आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवतामावाहयामि स्थापयामि ।। १७ ।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमं तनोत्वरिष्टं य्यज्ञꣳ समिमं दधातु ।। व्विश्श्वेदेवास ऽइह मादयन्तामोँ३ प्रतिष्ठ ।।

गौर्याद्याः कुलदेवतान्तमातरो गणपतिसहिताः सुप्रतिष्ठिताः वरदाः भवन्तु ।।

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।। १ ।।

धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः ।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश ।। २ ।।

ॐ गणपत्यादिकुलदेवतान्तमातृभ्यो नमः इत्यभ्यर्चनम् ।।

❋ अथ वसोर्द्धारापूजनम् ❋

आग्नेय्यां भित्तौ कुङ्कुमादिना बिन्दुकरणेनालङ्करणं कृत्वाऽऽगामिमन्त्रं पठन् घृतेन सप्तधाराः प्राक्संस्था उदक्संस्था वा कुर्यात् ।।

व्वसोः पवित्त्रमसि शतधारं व्वसोः पवित्त्रमसि सहस्रधारम् ।। देवस्त्वा सविता पुनातु व्वसोः पवित्त्रेण शतधारेण सुप्वा ।। इति मन्त्रेण वसोर्द्धाराः कर्तव्याः ।। ॐ कामंधुक्षः इत्येतावता मन्त्रेण धारामर्धभागेन गुडेनैकीकरणम् । प्रतिधारामेकैकदेवतामावाहयेत् ।। ॐ मनसः काममाकूतिं व्वाचः सत्त्यमशीय ।। पशूनाꣳ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा ।। ॐ श्रियै नमः श्रियमावाहयामि स्थापयामि ।। १ ।। ॐ श्रीश्च ते

लक्ष्मीश्च्च पत्न्यावहोरात्त्रे पाश्श्र्वे नक्षत्त्राणि रूपमश्श्विनौ व्यात्तम् ।। इष्ण्ण-न्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ।। ॐ लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि ।। २ ।। ॐ भद्द्रं कर्ण्णेभिः श्रृणुयाम देवा भद्द्रं पश्येमाक्षभिर्य्यजत्त्राः ।। स्थिरैरङ्गैस्तुष्टुवाᳪंसस्तनूभिर्व्व्यशेमहि देवहितं य्यदायुः ।। ॐ धृत्यै नमः धृतिमावाहयामि स्थापयामि ।।३।। ॐ मेधाम्मे व्वरुणो ददातु मेधामग्निः प्प्रजापतिः ।। मेधामिन्द्रश्श्च व्वायुश्श्च मेधान्धाता ददातु मे स्वाहा ।। ॐ मेधायै नमः मेधामावाहयामि स्थापयामि ।। ४ ।। ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा श्रोत्त्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा ।। ॐ स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ।। ५ ।। ॐ आयङ्गौः पृश्निरक्क्रमीदसदन्न्मातरम्पुरः पितरञ्च प्प्रयन्त्स्वः ।। ॐ प्रज्ञायै नमः प्रज्ञामावाहयामि स्थापयामि ।। ६ ।। ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवति यज्ञं व्वष्टुधियावसुः ।। ॐ सरस्वत्यै नमः सरस्वतीमावाहयामि स्थापयामि ।

ॐ श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः, इति मन्त्रेण वा ।।

ॐ वसोर्धारादेवताभ्यो नमः, इत्यावाह्य ।। ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टं य्यज्ञᳪं समिमं दधातु व्विश्वेदेवा स इह मादयन्तामों३ प्रतिष्ठ ।। वसोर्द्धारादेवताः सुप्रतिष्ठिताः वरदाः भवन्तु ।। सम्पूज्य प्रार्थयेत् ।।

यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ।।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ।
अनया पूजया वसोर्द्धारादेवताः प्रीयन्ताम् ।।

इति वसोर्द्धाराकरणम् ।

अथ साङ्कल्पिकेन विधिना [1]नान्दीश्राद्धप्रयोगः ।

सव्येन[2] सर्वं कार्यम् ।। ऋजवः एव कुशास्तिलस्थाने यवा दातव्याः ।। ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।। ॐ मातृपितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।। ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं वृद्धिः ।। ॐ मातामह-प्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ।।

आसनदानम्—

सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ।। ॐ मातृपितामहीप्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्त्यो भवन्त्यः तथा प्राप्नुवामः ।। ॐ पितृपितामहप्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ।। ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दी-

---

[1] टि०—भविष्यपुराणे—

"पिण्डनिर्वपणं कुर्य्यान्न वा कुर्य्यान्नराधिप ! वृद्धिश्राद्धे महाबाहो !
कुलधर्म्मानवेक्ष्य हि" ।।

[2] टि०—अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् । अनाम्नामतिलाद्यैश्च
नान्दीश्राद्धं च सव्यवत् ।।

श्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥

ततो गन्धादिदानम्—

सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातृपितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ पितृपितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातामह-प्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ॥ भोजननिष्क्रयदानम्[1] । ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातृपितामही-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ पितृपितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ।

स-क्षीरयवमुदकदानम्—

सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम् ॥ मातृपितामही-प्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॥ पितृपितामह-

---

[1] टि०—नान्दीश्राद्धे अन्नाभावे आमं, आमाभावे हिरण्यं, हिरण्याभावे युग्मब्राह्मणभोजन-पर्याप्तान्ननिष्क्रयीभूतयथाशक्ति किञ्चिद् द्रव्यदानम् । इति धर्मसिन्धौ ॥

प्रपितामहाः नान्दीमुखाः प्रीयन्ताम् ।। मातामह-प्रमातामह वृद्ध-प्रमातामहाः :सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ।। शिवा आपः सन्तु, इति जलम् ।। सौमनस्यमस्तु इति पुष्पम् ।। अक्षतं चारिष्टञ्चाऽस्तु, इत्यक्षतान् ।। अघोराः पितरः सन्तु ।। इति पूर्वाग्रां जलधारां दद्यात् ।। इति समाचारः ।। केवलपाठमात्रम् ।। ततः कृताञ्जलिः प्रार्थयेत् ।। यजमानः— ॐ गोत्रन्नो वर्धतां दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ।। श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्तु अन्नं च नो बहु भवेदतिथींश्च लभेमहि ।। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ।। एताः सत्या आशिषः सन्तु ।। ब्राह्मणाः—सन्त्वेताः सत्या आशिष इति ।।

दक्षिणादानम् ।। ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दोश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलक-यव-मूल[1]निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ।। ॐ मातृपितामही[2]-प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ।। ॐ पितृपितामह-प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ।। ॐ मातामह प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे ।।

---

[1] मुनक्का । आँवला । जौ । अदरखमूल—इत्यादि ।

[2] माता पितामही चैव तथैव प्रपितामही ।। पिता पितामहश्चैव तथैव प्रपितामहः ।। मातामहस्तत्पिता च प्रमातामहकादयः । एते भवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम् ।।

ॐ उपास्म्मै गायता नरः पवमानायेन्न्दवे ।। अभि देवाँ २ इयक्षते ।। इडामग्ग्ने पुरुदꣳसꣳसनिं गोः शश्वत्तमꣳ हवमानाय साध ।। स्यान्नः सूनुस्तनयो व्विजावाग्ग्ने सा ते सुमतिर्भूत्त्वस्मे ।। यजमानः—अनेन नान्दीश्राद्धं सम्पन्नम् ।। ब्राह्मणाः—सुसम्पन्नम् । व्वाजेवाजे इति विसृज्य ॐ व्वाजेवाजेऽवत व्वाजिनो नो धनेषु व्विप्रा ऽअमृता ऽऋतज्ञाः ।। अस्य मद्ध्वः पिबत मादयद्ध्व तृप्प्ता यात पथिभिर्द्देवयानैः ।। आ मा व्वाजस्येत्यनुवृज्य ।। ॐ आ मा व्वाजस्य प्प्रसवो जगम्म्या देमे द्यावापृथिवी व्विश्वरूपे ।। आ मा गन्तां पितरा मातरा चा मः सोमोऽअमृतत्वेन गम्म्यात् ।।

विश्वेदेवाः प्रीयन्तामिति विसृज्य ।। यजमानः—मयाऽऽचरिते साङ्कल्पिकनान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीगणेशप्रसादात् परिपूर्णोऽस्तु । ब्राह्मणाः—अस्तु परिपूर्णः ।। इति नान्दीश्राद्धप्रयोगः ।।

आचार्यवरणम् ।

उदङ्मुखमाचार्यमुपवेश्य गन्धादिभिः सम्पूज्य ॐ अमुकगोत्रोत्पन्नः अमुकप्रवरान्वितः अमुकशर्माऽहं अमुकगोत्रोत्पन्नममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाजसनेयमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन् गुरुमंडलार्चनाख्ये कर्मणि एभिर्वरणद्रव्यैः आचार्यत्वेन त्वामहं वृणे, इति यजमानः ।। वृतोऽस्मि, इति विप्रप्रतिवचनम् ।।

यजमानः—आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ।।

ॐ व्व्रतेन दीक्षामाप्प्नोति दीक्षयाप्प्नोति दक्षिणाम् ।। दक्षिणा श्श्रद्धामाप्प्नोति श्श्रद्धया सत्त्यमाप्प्यते ।।

अथ यजमानः करसम्पुटं कृत्वा प्रार्थयेत् ।।

अस्मिन्कर्मणि ये विप्राः वृता गुरुमुखादयः ।
सावधानाः प्रकुर्वन्तु सर्वं कर्म यथोदितम् ॥
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ।
सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम् ॥
यथाविहितं कर्म कुरु ॥ विप्रः—यथाज्ञानं करवाणि ॥

इत्याचार्यवरणम् ।

आचार्यः आचम्य प्राणानायम्य ॥ देशकालौ सङ्कीर्त्य अस्मिन् गुरुमंडलार्चनाख्ये कर्मणि यजमानेन वृतोऽहं आचार्यकर्म करिष्ये ॥ आचार्यो वामहस्ते गौरसर्षपान् गृहीत्वा दिग्रक्षणं कुर्यात् । तत्र मन्त्राः ।

रक्षोहणं व्वलगहनं व्वैष्णवीमिदमहं तं व्वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहं तं व्वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं व्वलगमुत्किरामि यं मे सबन्धुर्य्यमसबन्धुर्निचखानेदमहं तं व्वलगमुत्किरामि यं मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ १ ॥ रक्षोहणो वो व्वलगहनः प्प्रोक्षामि व्वैष्णवान्त्रक्षोहणो वो व्वलगहनोऽवनयामि व्वैष्णवान्त्रक्षोहणो वो व्वलगहनोऽवस्तृणामि व्वैष्णवान्त्रक्षोहणौ वां व्वलगहना ऽउपदधामि व्वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्य्यूहामि व्वैष्णवी व्वैष्णवमसि व्वैष्णवाः स्थ ॥ २ ॥ रक्षसां भागोऽसि निरस्तꣳ रक्षऽइदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाध ऽइदमहꣳ रक्षोऽधम तमो नयामि ॥ घृतेन द्यावापृथिवी प्प्रोर्णुवाथां व्वायो व्वेस्तोकानामग्निराज्ज्यस्य व्वेतु स्वाहा स्वाहाकृते ऽऊर्ध्वनभसं मारुतं गच्छतम् ॥ ३ ॥ रक्षोहा व्विश्वचर्ष्षणिरभि योनिमयोहते ॥ द्द्रोणे सधस्थमासदत् ॥ ४ ॥

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ॥ १ ॥

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ २ ॥
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन शान्तिकर्म समारभे ॥ ३ ॥
भूतानि राक्षसा वाऽपि येऽत्र निष्ठन्ति केचन ।
ते सर्वेऽप्यपगच्छन्तु ग्रहयागं करोम्यहम् ॥ ४ ॥

इति तिष्ठन् पूर्वादिदिक्षु विकिरेत् । उदकोपस्पर्शः ।

ततो वास्तुपूजनम् ।

आचम्य प्राणानायम्य ॥ संकल्पः ॥ देशकालौ संकीर्त्य० अमुकगोत्रोहं अमुकशर्माहं सपत्नीकोऽहं सनवग्रहमखहवनात्मकगुरुमंडलार्चनकर्मणि मण्डपाङ्गवास्तुपूजनं करिष्ये ॥ ततो वास्तुमण्डलचतुष्कोणेषु आग्नेयादिप्रदक्षिणक्रमेण शंकुरोपणम् ॥

रोपणमन्त्रः—

विशन्तु भूतले नागा लोकपालाश्च सर्वतः ।
मण्डपेऽत्राऽवतिष्ठन्ति आयुर्बलकराः सदा ॥

इति चतुर्विदिक्षु रोपयेत् ॥ शंकूनां पार्श्वे रोपणक्रमेण सदीपदधिमाषबलिं दद्यात् ॥ तद्यथा ॥

अग्निभ्योऽथ सर्पेभ्यो ये ये चान्ये तत्समाश्रिताः ।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ इत्याग्नेयाम् ॥
नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः ।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ इति नैर्ऋत्याम् ॥
वायव्याधिपतिश्चैव वायव्यां ये च राक्षसाः ।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥ इति वायव्याम् ॥
रुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तत्समाश्रिताः ।
बलिं तेभ्यः प्रयच्छामि गृह्णन्तु सततोत्सुकाः ॥ इत्यैशान्याम् ॥

ततो वास्तुपीठे वस्त्रं प्रसार्य रजतपुटके कुंकुमं गृहीत्वा कनकशलाकया नव रेखा कार्या ।। प्रथमप्रागन्ता: ।। ॐ लक्ष्म्यै नमः ।। १ ।। ॐ यशोवत्यै नमः ।। २ ।। ॐ कान्तायै नमः ।।३।। ॐ सुप्रियायै नमः ।। ४ ।। ॐ विमलायै नमः ।। ५ ।। ॐ श्रियै नमः ।। ६ ।। ॐ सुभगायै नमः ।। ७ ।। ॐ सुमत्यै नमः ।। ८ ।। ॐ इडायै नमः ।। ९ ।। तत उदगन्ताः रेखाः कार्याः ।। ॐ धान्यायै नमः ।। १ ।। ॐ प्राणायै नमः ।। २ ।। ॐ विशालायै नमः ।। ३ ।। ॐ स्थिरायै नमः ।। ४ ।। ॐ भद्रायै नमः ।। ५ ।। ॐ जयायै नमः ।। ६ ।। ॐ निशायै नमः ।। ७ ।। ॐ विरजायै नमः ।। ८ ।। ॐ विभवायै नमः ।। ९ ।। इति रेखादेवता सम्पूज्य । ततः शिख्यादिवास्तुमण्डलदेवताः प्रतिमास्वक्षतपुञ्जेषु पूगीफलेषु वा प्रतिष्ठापयेत्पूजयेच्च ।। तद्यथा ।। ईशानकोणदक्षिणार्द्धे वास्तुशिरसि शिखी रक्तः ।।

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियं जिन्वमवसे हूमहे व्वयम् ।। पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदंब्धः स्वस्तये ।। ॐ भूर्भुवः स्वः शिखिने नमः शिखिनमा० ।।१।।

तद्दक्षिणसार्द्धपदे दक्षिणनेत्रे पर्जन्यः पीतः ।।

ॐ शन्नो व्वातः पवताꣳ शन्नस्तपतु सूर्यः ।। शन्नः कनिक्रदद्देवः पर्ज्जन्यो ऽअभिवर्षतु ।। ॐ भू० पर्ज्जन्याय० पर्ज्जन्यं० ।।

तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयन्तं पीतम् ।।

ॐ मर्म्माणि ते व्वर्म्मणा च्छादयामि सोमस्त्वा राजा मृते नानुवस्ताम् ।। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानुदेवा मदन्तु ।।

ॐ भू० जयन्ताय नमः जयन्तं० ।। ३ ।।

तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधं पीतम् ।।

ॐ महाँ२ ऽइन्द्रो य ऽओजसा पर्ज्जन्यो व्वृष्टिमाँ२ऽ इव ॥ स्तामैर्व्वत्सस्य व्वावृधे ॥ उपयाम गृहीतोऽसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥ ॐ भू० कुलिशायुधाय नमः कुलिशायुधं० ॥ ४ ॥

तद्दक्षिणपदद्वये दक्षिणबाहुं सूर्यं रक्तम् ॥

ॐ बण्महाँ२ ऽअसि सूर्य्य वडादित्य महाँ२ ऽअसि ॥ महस्ते सतो महिमा पनस्य तेद्धा देव महाँ२ असि ॥ ॐ भू० सूर्याय० सूर्यं० ॥ ५ ॥

तद्दक्षिणपदद्वये दक्षिणप्रवाहवे सत्यं श्वेतम् ॥

ॐ व्रतेन दीक्षामाप्नोति दीक्षयाऽऽप्नोति दक्षिणाम् ॥ दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥ ॐ भू० सत्याय० सत्यं० ॥ ६ ॥

तद्दक्षिणसार्द्धपदे दक्षिणकूर्परे भृशं कृष्णम् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्यशेमहि देव हितं य्यदायुः ॥ ॐ भू० भृशाय नमः भृशं० ॥ ७ ॥

तद्दक्षिणाग्नेयपूर्वपदार्धे दक्षिणप्रवाहौ आकाशं कृष्णम् ॥

ॐ घृतं घृतपावानः पिबत व्वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश ऽआदिशो व्विदिश ऽउद्दिशो दिग्भ्यः स्वाहा ॥ ॐ भू० आकाशाय नमः आकाशं०॥८॥

तत्पश्चिमार्द्धे दक्षिणप्रवाहौ वायुं धूम्रम् ॥

ॐ आ नो नियुद्भिः शतिनीभिरध्वरठँ सहस्रिणीभिरुपयाहि यज्ञम् ॥ व्वायो ऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ ॐ भू० वायवे नमः वायुं० ॥ ९ ॥

तत्पश्चिमसार्द्धपदे दक्षिणमणिबन्धे पूषाणं रक्तम् ॥

ॐ पूषन्तव व्व्रते व्वयन्नरिष्ष्येम कदाचन ॥ स्तोतारस्त ऽइह स्म्मसि ॥ ॐ भू० पूष्णे नमः पूषाणं० ॥ १० ॥

तत्पश्चिमपदद्वये दक्षिणपार्श्वे वितथं श्वेतम् ॥

ॐ तत्सूर्य्यस्य देवत्वन्तन्महित्त्वम्मद्ध्या कर्त्तोर्व्विततठं सञ्जभार ॥ यदेदयुक्त हरितः सधस्त्थादाद्द्रात्री व्वासस्तनुते सिमस्म्मै ॥ ॐ भू० वितथाय नमः वितथमा० ॥ ११ ॥

तत्पश्चिमपदद्वये दक्षिणपार्श्वे गृहक्षतं पीतम् ॥

ॐ अक्षन्नमी मदन्त ह्यव प्रिया ऽअधूषत ॥ अस्तोषत स्वभानवो व्विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥ ॐ भू० गृहक्षताय नमः गृहक्षतमा० ॥ १२ ॥

तत्पश्चिमपदद्वये दक्षिणोरौ यमं कृष्णम् ॥

ॐ यमाय त्वांगिरस्वते पितृमते स्वाहा ॥ स्वाहा धर्म्माय स्वाहा घर्म्मः पित्रे ॥ ॐ भू० यमाय० यमं० ॥ १३ ॥

तत्पश्चिमपदद्वये दक्षिणजानौ गन्धर्वं रक्तम् ॥

ॐ गन्धर्व्वस्त्वा व्विश्श्वा वसुः परिदधातु व्विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽईडितः ॥ इन्द्रस्य बाहुरसि दक्षिणो व्विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ऽईडितः ॥ मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा व्विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड ईडितः ॥ ॐ भू० गन्धर्वाय नमः गन्धर्वमा० ॥ १४ ॥

तत्पश्चिमसार्द्धपदे दक्षिणजंघायां भृङ्गराजं कृष्णम् ॥

ॐ सौरी बलाका शार्ङ्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्श्वाविद्भौमी शार्दूलो व्वृकः पृदाकुस्ते मन्न्यवे सरस्वते शुकः पुरुषवाक् ॥ ॐ भू० भृंगराजाय० भृंगराजं० ॥ १५ ॥

तत्पश्चिमनैर्ऋत्यपदार्धे दक्षिणस्फिचि मृगं पीतम् ॥

ॐ मृगो न भीमः कुचरो गिरिष्ठाः परावत ऽआजगन्था परस्याः ॥ सृकꣳ सꣳ शाय पविमिन्द्र तिग्मं व्विशत्रून्ताड्ढि व्विमृधो नुदस्व ॥ ॐ भू० मृगाय नमः मृगं० ॥ १६ ॥

तत्पश्चिमनैऋत्यपदार्धे पादयोः पितॄन् रक्तान् ॥

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्निपतरो मीमदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ॐ भू० पितृभ्यो नमः पितॄना० ॥ १७ ॥

तदुत्तरसार्द्धपदे वामस्फिचि दौवारिकं रवतम् ॥

ॐ द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठ ॥ नेष्ट्रादृतुभिरिष्यत ॥ ॐ भू० दौवारिकाय० दौवारिकमा० ॥ १८ ॥

तदुत्तरपदद्वये वामजंघायां सुग्रीवं श्वेतम् ॥

ॐ नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्द्रा ऽउपश्रिताः ॥ तेषाꣳ सहस्रयोजनेव धन्न्वानि तन्न्मसि ॥ ॐ भू० सुग्रीवाय नमः सुग्रीवमा० ॥ १९ ॥

तदुत्तरपदद्वये वामजानुप्रदेशे पुष्पदन्तं रक्तम् ॥

ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्व्रातेभ्यो व्व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्च वो नमः ॥ ॐ भू० पुष्पदन्ताय नमः पुष्पदन्तं० ॥ २० ॥

तदुत्तरपदद्वये वामोरौ वरुणं श्वेतम् ॥

ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय ॥ त्वामवस्युराचके ॥ ॐ भू० वरुणाय० वरुणमा० ॥ २१ ॥

तदुत्तरपदद्वये वामपार्श्वे असुरं पीतम् ॥

ॐ ये रूपाणि प्प्रतिमुञ्चमाना ऽअसुराः सन्तः स्वधया

चरन्ति ।। परा पूरोनि पुरो ये भरन्त्यन्निष्टाँल्लोकात्प्रणुदात्यस्मात् ।। ॐ असुराय नमः असुरमा० ।। २२ ।।

तदुत्तरसार्द्धपदे वामपार्श्वे शेषं कृष्णम् ।।

या ऽइषवो यातुधाना नान्येवा ब्वनस्प्पती १ँ रनु ।। ये वावटेषु शेरते तेभ्यः सर्प्पेभ्यो नमः ।। ॐ भू० शेषाय नमः शेषमा० ।। २३ ।।

तदुत्तरवायव्यपदार्धे दाममणिबन्धे पापं पीतम् ।।

ॐ एतत्ते रुद्द्रा वसन्ते न परो मूजवतोतीहि ।। अवतत धन्न्वा पिनाका वसः कृत्तिवासा ऽअहिंठँ सन्नः शिवोतीहि ।। ॐ भू० पापाय नमः पापं० ।। २४ ।।

तत्प्राक् वायव्यपदार्द्धे वामप्रवाहौ रोगं रक्तम् ।।

ॐ द्रापे ऽअन्धसस्प्पते दरिद्र नीललोहित ।। आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मा रोङ् मोचनः किञ्चनाममत् ।। ॐ भू० रोगाय० रोगं० ।। २५ ।।

तत्प्राक्सार्द्धपदे वामप्रवाहौ अहिर्बुध्न्यं रक्तम् ।।

ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।। ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ।। ॐ भू० अहिर्बुध्न्याय नमः अहिर्बुध्न्यमा० ।। २६ ।।

तत्प्राक्पदद्वये वामकूर्परे मुख्यं रक्तम् ।।

ॐ अवतत्त्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।। निशीर्य्य शल्ल्यानाम्मुखा शिवो नः सुमना भव ।। ॐ मुख्याय नमः मुख्यं० ।। २७ ।।

तत्प्राक् पदद्वये वामबाहौ भल्लाटं कृष्णम् ।।

ॐ इमा रुद्द्राय तवसे कपर्द्दिने क्षयद्वीराय प्प्रभरामहे मतीः ।। यथा शमसद्द्विपदे चतुष्पदे व्विश्वम्पुष्टङ् ग्रामे ऽअस्मिन्ननातुरम् ।। ॐ भू० भल्लाटाय नमः भल्लाटं० ।। २८ ।।

तत्प्राक्पदद्वये वामबाहौ सोमं श्वेतम् ॥

ॐ व्वयर्ठ० सोम व्व्रतेतव मनस्तनूषु विभ्रतः ॥ प्रजावन्तः सचेमहि ॥ ॐ भू० सोमाय नमः सोममावाहयामि ॥ २९ ॥

तत्प्राक्पदद्वये वामांसे सर्पान् कृष्णान् ॥

ॐ नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु ॥ ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ ॐ भू० सर्पेभ्यो नमः सर्पाना० ॥ ३० ॥

तत्प्राक्सार्द्धपदे वामश्रोत्रे अदितिं पीतम् ॥

ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः ॥ व्विश्श्वे देवाऽअदितिः पञ्चजना ऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ ॐ भू० अदितये० अदितिमा० ॥ ३१ ॥

तात्प्रागर्द्धपदे वामनेत्रे दितिं पीतम् ॥

ॐ इड ऽएह्यदिति ऽएहि काम्या एत ॥ मयि वः कामधरणं भूयात् ॥ ॐ भू० दितये नमः दितिमा० ॥ ३२ ॥

ईशानपदोत्तरार्द्धे शिखिपदादधः अपः श्वेतम् ॥

ॐ आपो ऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ व्विश्वर्ठ० हरिप्प्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत ऽएमि ॥ ॐ भू० अद्भ्यो नमः अपः आवा० ॥ ३३ ॥

ततः ईशानपददक्षिणार्द्धे मुखे आपवत्सं श्वेतम् ॥

ॐ आ ते वत्सो मनोयमत्परमाच्चित्सधस्त्यात् ॥ अग्ने त्वां कामयागिरी ॥ ॐ भू० आपवत्साय नमः आपवत्सं० ॥३४॥

ततः पूर्वपदद्वये दक्षिणस्तने अर्य्यमाणं कृष्णम् ॥

ॐ यदद्य सूर ऽउदिते नागा मित्रो ऽअर्य्यमा ॥ सुवाति सविता भगः ॥ ॐ भू० अर्य्यम्णे नमः अर्य्यमाणं० ॥ ३५ ॥

तद्दक्षिणाग्नेयपदार्द्धे दक्षिणहस्ते सावित्रं श्वेतम् ॥

ॐ उपयाम गृहीतोसि सावित्रो सिचनो धाश्च नो धा ऽअसि च नो मयि धेहि ।। जिन्व यज्ञञ्जिन्वं यज्ञपतिम्भगाय देवाय त्वा सवित्रे ।। ॐ भू० सावित्राय० सावित्रमा० ।। ३६ ।।

आग्नेयपदपश्चिमार्द्धे सवितरं रक्तम् ।।

ॐ व्विश्श्वानि देव सवितर्दुरितानि परासुव ।। यद्भद्रन्तन्न ऽआसुव ।। ॐ भू० सवित्रे नमः सवितारमा० ।।३७।।

तत्पश्चिमपदद्वये जठरं दक्षिणभागे विवस्वन्तं श्वेतम् ।।

ॐ व्विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्नमत्स्व ।। श्रदस्म्मै नरो व्वचसे दधातन यदाशीर्द्दा दम्पती व्वाममश्नुतः ।। पुमान्न पुत्रो जायते व्विन्दते व्वस्वधा व्विश्श्वाहारप ऽएधते गृहे ।। ॐ भू० विवस्वते नमः विवस्वन्तं० ।। ३८ ।।

तत्पश्चिमनैर्ऋत्यपदार्द्धे वृषणयोः विबुधाधिपं रक्तम् ।।

ॐ स वोधि सूरिर्म्मघवा व्वसुपते व्वसुदावन् ।। युयोद्ध्यस्मद्द्वेषाᳪसि व्विश्श्वकर्म्मणे स्वाहा ।। ॐ भू० विबुधाधिपाय नमः विबुधाधिपं० ।। ३९ ।।

तदुत्तरार्द्धे मेढ्रे जयन्तं श्वेतम् ।।

ॐ मर्म्माणि ते वर्म्मणा च्छादयामि सोमस्त्वा राजा मृतेनानु वस्ताम् ।। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ।। ॐ भू० जयन्ताय नमः जयन्तं ।। ४० ।।

तदुत्तरपदद्वये जठरवामभागे मित्रं श्वेतम् ।।

ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपङ्कृणुते द्यौरुपस्त्थे ।। अनन्तमन्न्यद्द्रुशदस्य पाजः कृष्णमन्न्यद्धरितः सम्भरन्ति ।। ॐ भू० मित्राय नमः मित्रं० ।। ४१ ।।

तदुत्तरवायव्यपदार्धे वामहस्ते राजयक्ष्माणं रक्तम् ।।

ॐ अभिगोत्राणि सहसा गाहमानो दयोव्वीरः शतमन्न्यु-

रिन्द्रः ।। दुश्श्च्यवनः पृतना षाड युद्ध्योऽस्म्माकꣳ सेना ऽअवतु प्प्रयुत्त्सु ।। ॐ भूः० राजयक्ष्मणे नमः राजयक्ष्माणं० ।। ४२ ।।

तत्पूर्वार्द्धे वामहस्ते रुद्रं रक्तम् ।।

ॐ नमस्ते रुद्द्र मन्न्यव ऽउतोत ऽइषवे नमः ।। बाहुभ्भ्यामुत ते नमः ।। ॐ भूः० रुद्राय नमः रुद्रं० ।। ४३ ।।

तत्पूर्वपदद्वये वामस्तने पृथिवीधरं रक्तम् ।।

ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी ।। यच्छानः शर्म्मं सप्रथाः ।। ॐ भूः० पृथिवीधराय नमः पृथिवीधरं० ।।४४।।

ततो मध्यपदचतुष्के हृदये नाभौ च ब्रह्माणं पीतं श्वेतं वा ।।

ॐ ब्रह्म यज्ञानं प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेन ऽआवः सबुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ।। ॐ भूः० ब्रह्मणे० ब्रह्माणं० ।। ४५ ।।

ततो मण्डलाद्बाह्ये ईशानादिकोणेषु चरक्या स्थापयेत् ।। ईशान्यां चरकीं धूम्रवर्णाम् ।।

ॐ ईशाव्वास्यमिदꣳ सर्व्वं य्यत्किञ्च जगत्याञ्जगत् ।। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।। ॐ चरक्यै नमः चरकीमा० ।।१।।

आग्नेय्यां विदारीं रक्ताम् ।।

ॐ अक्षराजाय कितवङ् कृताया दिनवद्द्रर्शन्त्रेतायै कल्प्पनन्द्वापरायाधिकल्पिनमास्कन्दाय सभास्थाणुम्मृत्यवे गोव्व्यच्छमन्तकाय गोघातङ् क्षुधे योगां व्विकृन्तन्तम्भिक्षमाण ऽउपतिष्ठति दुष्कृताय चरका चार्य्यम्पाप्मने सैलगम् ।। ॐ भूः० विदार्य्यै नमः विदारीमा० ।।

ततो नैर्ऋत्ये पूतनां पीताम् ।।

ॐ नमः स्रुत्याय च पथ्याय च नमः काटयाय च नीप्याय

च नमः कुल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च ॥

ॐ भू० पूतनायै नमः पूतना० ॥ ३ ॥

ततो वायव्ये पापराक्षसीं कृष्णाम् ॥

ॐ यस्यास्ते घोर ऽआसञ्जुहोम्म्येषाम्बन्धानामव सर्ज्जनाय ॥ यान्त्वा जनो भूमिरिति प्प्रमंदते निर्ऋतिन्त्वाहम्परिवेद व्विश्श्वतः ॥ ॐ भू० पापराक्षस्यै नमः पापराक्षसीं ॥ ४ ॥

ततः पूर्वादिक्रमेण स्कन्दादीन् । पूर्वे स्कन्दं रक्तम् ॥

ॐ यदक्रन्दः प्रथमं जायमान ऽउद्यन्त्समुद्द्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यम्महिषा तन्ते ऽअर्व्वन् ॥ ॐ भू० स्कन्दाय नमः स्कन्दमा० ॥ १ ॥
ततो दक्षिणे अर्य्यमणे कृष्णम् ॥

ॐ यदद्य सूर ऽउदिते नागा मित्त्रो ऽअर्य्यमा ॥ सुवाति सविता भगः ॥ ॐ भू० अर्य्यमणे नमः अर्य्यमाणं ॥२॥

ततो पश्चिमे जृम्भकं रक्तम् ॥

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा क्क्रन्दाय स्वाहा स्वाहा प्रोथते स्वाहा प्प्रप्पोथाय स्वाहा गन्धाय स्वाहा ग्घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा बल्गते स्वाहा सोनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्ग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा व्विचृत्ताय स्वाहा सꣳहनाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ॥ ॐ भू० जृम्भकाय० जृम्भकं० ॥ ३ ॥

तत उत्तरे पिलिपिच्छं पीतम् ॥

ॐ कास्विदासीत्पूर्व्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ॥ कास्विदासीत्पिलिप्पिका स्विदासीत्पिशङ्गिला ॥ ॐ भू० पिलि-

पिच्छाय० पिलिपिच्छं० ॥ ४ ॥

ततः पुनः मण्डलाद्वाह्ये प्रागादि दिक्षु विदिक्षु इन्द्रादिदशदिक्पालानावाहयेत् ॥

ॐ त्रातारमिन्द्रमवितारमिन्द्रठँ हवे हवे सुहवठँ शूरमिन्द्रम् ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रँ स्वस्ति नो मघवा धात्विन्द्रः ॥ ॐ भू० इन्द्राय नमः इन्द्रं० ॥ १ ॥

आग्नेयाम् ॥ ॐ त्वन्नो ऽअग्ने तव देव पायुभिर्मघो नो रक्ष तन्न्ववन्द्य ॥ त्राता लोकस्य तनये गवामस्य निमिषठँ रक्षमाणस्तव व्व्रते ॥ ॐ भू० अग्नये० अग्निमा ॥ २ ॥

दक्षिणे ॥ ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा स्वाहा घर्माय स्वाहा घर्म्मः पित्रे ॥ ॐ भू० यमाय नमः यममा० ॥३॥

नैर्ऋत्ये ॥ ॐ असुन्त्वन्तमयजमानमिच्छस्तेन स्येत्यामन्विहि तस्करस्य ॥ अन्न्यमस्म्मादिच्छ सा त ऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ॐ भू० निर्ऋतये० निर्ऋतिमा० ॥ ४ ॥

पश्चिमे ॥ ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो व्वरुणेह बोध्युरुशठँ समान ऽआयुः प्प्रमोषीः ॥ ॐ भू० वरुणाय० वरुणमा० ॥ ५ ॥

वायव्ये ॥ ॐ आनो नियुद्भिः शतिनीभिरध्वरठँ सहस्रिणीभिरुप याहि यज्ञम् । व्वायो ऽअस्मिन्त्सवनमादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ ॐ भू० वायवे० वायुमा० ॥ ६ ॥

उत्तरे ॥ ॐ व्वयठँ सोम व्रते तव मनस्तनूषु विभ्रतः ॥ प्प्रजावन्तः सचेमहि ॥ ॐ भू० सोमाय० सोममा० ॥ ७ ॥

ईशान्याम् ॥ ॐ तमीशानञ्जगतस्तस्त्थुषस्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम् ॥ पूषा नो यथा व्वेद सामसद्वृधे रक्षिता

पायुरदब्धः स्वस्तये ।। ॐ भू० ईशानाय० ईशानं० ।। ८ ।। (इति अष्टलोकपालाः) ।।

ईशानेन्द्रमध्ये ।। ॐ अस्मे रुद्रा मेहनापर्व्वतासो व्वृत्रहत्त्ये भरहूतौ सजोषाः ।। यः शठँसते स्तुवते धायिपज्ज ऽइन्द्रज्येष्ठा ऽअस्माँ२ऽ अवन्तु देवाः ।। ॐ भू० ब्रह्मणे० ब्रह्माणं० ।। ९ ।।

निर्ऋतिवरुणयोर्मध्ये ।। ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनि ।। यच्छानः शर्म्मं सप्प्रथाः ।। ॐ भू० अनन्ताय० अनन्तमा० ।। १० ।। इति दशदिक्पालाः ।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञठँ समिमन्दधातु ।। व्विश्वेदेवास ऽइह मादयन्तामो३ँ प्रतिष्ठ ।। ॐ भू० शिख्यादिवास्तुमण्डलस्थदेवताः सुप्रतिष्ठिताः वरदाः भवन्तु ।। ॐ शिख्यादिवास्तुमण्डलस्थदेवताभ्यो नमः ।। इत्यभ्यर्चनम् ।। ततो मण्डलादीशान्यां उत्तरे वा ताम्रकलशमव्रणं सर्वलक्षणसंयुतं कलशस्थापनविधिना स्थापयेत् ।। तदा सुवर्णप्रतिमाया अग्न्युत्तारणम् ।। तद्यथा ।। देशकालौ संकीर्त्य गोत्रः शर्माहं अस्यां वास्तुमूर्त्तौ अवघातादिदोषपरिहारार्थं अग्न्युत्तारणं देवतासान्निध्यार्थं च प्राणप्रतिष्ठां करिष्ये ।। ततो मूर्त्तिं पात्रे निधाय घृतेनाभ्युक्ष्य तदुपरि दुग्धधारां च पातयेत् ।। तत्र मंत्राः ।।

ॐ समुद्द्रस्य त्वावकयाग्ग्नेपरि व्ययामसि ।। पावको ऽअस्म्यभ्यठँ शिवो भव ।। १ ।। ॐ हिमस्य त्वा जरायुणाग्ग्ने परिव्व्ययामसि ।। पावको ऽअस्मभ्यठँ शिवो भव ।। २ ।। ॐ उपज्ज्मन्नुप वेतसेवतर नदीष्वा ।। अग्ग्ने पित्तमपामसि मण्डकिताभिरागहिसेमन्नो यज्ञम्पावकवर्ण्णठँ शिवङ्कृधि ।। ३ ।। ॐ अपामिदन्न्ययनठँ समुद्द्रस्य निवेशनम् ।। अन्न्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यठँ शिवो भव ।। ४ ।। ॐ अग्ग्ने पावक-

रोचिषामन्द्रया देव जिह्वया ।। आदेवान्न्वक्षिपाक्षि च ।। ५ ।। ॐ स नः पावक दीदिवोग्ग्ने देवाँ२ इहावह ।। उप यज्ञठं हविश्च्च नः ।। ६ ।। ॐ पावकया यश्चितयन्त्यात्कृपाक्षामन्त्रुरुच ऽउषसो न भानुना ।। तूर्व्वन्नपामन्नेतशस्यनूरण आपो घृणेन त तृषाणो ऽअजरः ।। ७ ।। ॐ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्चिषे ।। अन्न्याँस्ते ऽअस्म्मत्तपन्तु हेतयः पावको ऽअस्मभ्यठं शिवो भव ।। ८ ।। नृषदेव्वे ऽप्सु यदेव्वेड्वर्हिषदेव्वेड्वनसदेव्वेस्वर्विदेव्वेट् ।।९।। ॐ ये देवा देवानां य्यज्ञिया यज्ञियानाᳪ संवत्सरीणमुपभागमासते ।। अहुतादोहविषो यज्ञे ऽअस्म्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ।। १० ।। ॐ ये देवा देवेष्वधि देवत्वमापन्न्ये ब्रह्मणः पुर ऽएतारो अस्य ।। येभ्यो न ऽऋतेपवते धाम किञ्चन न ते दिवो न ऽपृथिव्या ऽअधिस्न्नुषु ।। ११ ।। ॐ प्राणदा ऽअपानदा व्यानदा व्वर्च्चोदा व्वरिवोदाः ।। अन्न्याँस्ते ऽअस्म्मत्तपन्तु हेतयः पावको ऽअस्मभ्यठं शिवो भव ।। १२ ।। इत्यग्न्युत्तारणम् ।।

तदा सुवर्णप्रतिमां कलशोपरि स्थापयेत् पूजयेच्च ।।

अथ सर्वतोभद्रपूजनम् ।

ततः सर्वतोभद्रं रचियत्वा तत्र देवस्थापनं पूजनं च कृत्वा । ततः सर्वतोभद्रे कलशस्थापनविधिन कलशं संस्थाप्य कलशोपरि अग्न्युत्तारणपूर्वकप्रधानप्रतिमां संस्थाप्य विधिना पूजयेत् । तद्यथा ।।

प्रागुदीच्यां गता रेखा कुर्यादिकोनविंशतिः ।
खण्डेन्दुस्त्रिपदः श्वेतः पञ्चभिः कृष्णशृङ्खलाः ।। १ ।।
नीलैकादश वल्ली तु भद्रं रक्तपदैर्नव ।
चतुर्विंशत्सिता वापी परिधिः पीतविंशतिः ।। २ ।।
मध्ये षोडशभिः कोष्ठैः रक्तं पद्मं सकर्णिकम् ।
परिध्यावेष्टितं पद्मं बाह्ये सत्त्वं रजस्तमः ।।

तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरेश्वरान् ।। इति सर्वतोभद्रकारिका ।।

अथ वेदोक्तसर्वतोभद्र-देवतास्थापनक्रमः ।।

तद्यथा ।। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्द्वि सीमतः सुरु-

चोव्वेन ऽआवः ॥ स बुध्न्या ऽउपमा अस्य व्विष्ठ्ठाः सतश्च्च योनिमसतश्च्च व्विवः ॥ मध्ये कर्णिकायां ॥ ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्रह्माणमावाहयामि ॥ १ ॥

ॐ व्वयꣳ सोम व्व्रते तव मनस्तनूषु बिभ्भ्रतः ॥ प्रजावन्तः सचेमहि ॥ उत्तरे वाप्यां ॥ ॐ भूर्भुवः स्वः सोमाय नमः, सोममावाहयामि ॥२॥

ॐ तमीशानं जगतस्तस्त्थुषस्प्पतिन्न्धियंजिन्न्वमवसे हूमहे व्वयम् ॥ पूषा नो यथा व्वेदसामसद्द्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ईशान्यां खण्डेन्दौ ॥ ॐ भूर्भुवः स्वः ईशानाय नमः, ईशानमावाहयामि ॥ ३ ॥

ॐ त्त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्क्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्त्विन्द्रः ॥ पूर्वे वाप्यां ॥ ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि ॥ ४ ॥

ॐ त्वन्नो ऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्न्वश्च्च व्वन्द्य ॥ त्त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्व्रते ॥ आग्नेय्यां खण्डेन्दौ ॥ ॐ भूर्भुवः स्वः अग्नये नमः, अग्निमावाहयामि ॥ ५ ॥

ॐ यमाय त्त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः पित्त्रे ॥ दक्षिणे वाप्यां ॥ ॐ भूर्भुवः स्वः यमाय नमः, यममावाहयामि ॥ ६ ॥

ॐ असुन्न्वन्तमयजमानमिच्च्छ स्तेनस्येत्यामन्न्विहि तस्क्करस्य ॥ अन्न्यमस्म्मदिच्च्छ सा त ऽइत्या नमो देवि निर्ऋते तुब्भ्य मस्तु ॥ नैर्ऋत्यां खण्डेन्दौ ॥ ॐ भूर्भुवः स्वः निर्ऋतये नमः, निर्ऋतिमावाहयामि ॥ ७ ॥

ॐ तत्त्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ॥ अहेडमानो व्वरुणेह वोद्ध्युरुशठँस मा न ऽआयुः प्प्रमोषीः ॥ पश्चिमे वाप्यां ॥ ॐ भूर्भुवः स्वः वरुणाय नमः, वरुणमावाहयामि ॥ ८ ॥

ॐ आ नो नियुद्भिः शतिनीभिरध्वरठँ सहस्रिणीभिरुपयाहि यज्ञम् ॥ व्वायोऽअस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ वायव्यां खण्डेन्दौ ॥ ॐ भूर्भुवः स्वः वायवे नमः, वायुमावाहयामि ॥ ९ ॥

ॐ व्वसुब्भ्यस्त्वा रुद्रेब्भ्यस्त्वाऽऽदित्येब्भ्यस्त्वा सञ्जानाथां द्यावापृथिवी मित्त्रावरुणौ त्वा व्वृष्ट्यावताम् ॥ व्यन्तु व्वयोक्तठँ रिहाणा मरुतां पृषतीर्ग्गच्छ व्वशा पृश्निर्ब्भूत्वा दिवं गच्छ ततो नो व्वृष्टिमावह ॥ चक्षुष्प्पा ऽअग्ग्नेऽसि चक्षुर्म्मे पाहि ॥ वायुसोमयोर्मध्ये भद्रे ॥ ॐ भूर्भुवः स्वः अष्टवसुभ्यो नमः, अष्टवसून् आवाहयामि ॥ १० ॥

ॐ नमस्ते रुद्द्र मन्न्यव ऽउतो त ऽइषवे नमः ॥ बाहुब्भ्यामुत ते नमः ॥ सोमेशानयोर्मध्ये भद्रे ॥ ॐ भूर्भुवः स्वः एकादशरुद्रेभ्यो नमः, एकादशरुद्रानावाहयामि ॥ ११ ॥

ॐ यज्ञो देवानां प्रत्येति सुम्म्नमादित्यासो भवता मृडयन्तः ॥ आवोऽर्व्वाची सुमतिर्व्ववृत्त्यादठँ होश्चिद्या व्वरिवोवित्तरासत् ॥ ईशानेन्द्रमध्ये भद्रे ॥ ॐ भूर्भुवः स्वः द्वादशादित्येभ्यो नमः, द्वादशादित्यानावाहयामि ॥ १२ ॥

ॐ अश्विना तेजसा चक्षुः प्प्राणेन सरस्वती व्वीर्य्यम् ॥ व्वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥ इन्द्राग्निमध्ये भद्रे ॥ ॐ भूर्भुवः स्वः अश्विभ्यां नमः, अश्विनौ आवाहयामि ॥ १३ ॥

ॐ विश्वेदेवास ऽआगत श्रृणुताम ऽइमठँ हवम् ।। एदं बर्हिर्न्निषीदत ।। उपयामगृहीतोऽसि व्विश्श्वेब्भ्यस्त्वा देवेब्भ्य ऽएष ते योनिर्व्विश्वेब्भ्यस्त्वा देवेब्भ्यः ।। अग्नियममध्ये भद्रे ।। ॐ भूर्भुवः स्वः सपैतृकविश्वेभ्यो देवेभ्यो नमः, स-पैतृकविश्वान्देवानावाहयामि ।।

ॐ अभि त्वं देवठँ सवितारमोण्योः कविक्क्रतुमर्च्चामि सत्त्यसवठँरत्न्नधामभि प्प्रियं मतिङ्कविम् ।। ऊर्द्ध्वा यस्याऽमतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्क्रतुः कृपा स्वः ।। प्रजाब्भ्यस्त्वा प्प्रजास्त्वानुप्प्राणन्तु प्रजास्त्वमनुप्प्राणिहि ।। यमनिर्ऋतिमध्ये भद्रे ।। ॐ भूर्भुवः स्वः सप्तयक्षेभ्यो नमः, सप्तयक्षानावाहयामि ।। १५ ।।

ॐ नमोऽस्तु सर्प्पेब्भ्यो ये के च्च पृथिवीमनु ।। ये ऽअन्तरिक्षे ये दिवि तेब्भ्यः सर्प्पेब्भ्यो नमः ।। निर्ऋतिवरुणमध्ये भद्रे ।। ॐ भूर्भुवः स्वः अष्टकुलनागेभ्यो नमः, अप्टकुलनागानावाहयामि ।। १६ ।।

ॐ ऋताषाड्ऋतधामाग्निर्गन्धर्व्वस्तस्यौषधयोऽप्प्सरसो मुदो नाम ।। स न ऽइदं ब्ब्रह्म क्षत्त्रं पातु तस्म्मै स्वाहा व्वाट् ताब्भ्यः स्वाहा ।। वरुणवायुमध्ये भद्रे ।। ॐ भूर्भुवः स्वः गन्धर्वाऽप्सरोभ्यो नमः, गन्धर्दाऽप्सरसः आवाहयामि ।। १७ ।।

ॐ यदक्क्रन्दः प्प्रथमं जायमान ऽउद्यन्त्समुद्द्रादुत वा पुरीषात् ।। श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्त्यं महि जातं ते ऽअर्व्वन् ।। ब्रह्मसोममध्ये वाप्यां लिङ्गे वा ।। ॐ भूः स्कन्दाय नमः, स्कन्दमावाहयामि ।। १८ ।।

ॐ आशुः शिशानो व्वृषभो न भीमो घनाघनः क्षोभणश्च्चर्षणीनाम् ।। सङ्क्रन्दनो ऽनिमिष ऽएकवीरः शतठँ सेना ऽअजयत्त्साकमिन्द्रः ।। तदुत्तरे ।। ॐ भूर्भुवः स्वः वृषभाय नमः,

वृषभमावाहयामि ।। १९ ।।

ॐ कार्षिरसि समुद्द्रस्य त्त्वाक्षित्त्या ऽउन्नयामि ।। समापो ऽअद्भिरग्ग्मत समोषधीभिरोषधीः ।। तदुत्तरे ।। ॐ भूर्भुवः स्वः शूलाय नमः, शूलमावाहयामि ।। २० ।।

अनेनैव मंत्रेण तदुत्तरे ॐ भूर्भुवः स्वः महाकालाय नमः, महाकालमावाहयामि ।। २१ ।।

ॐ शुक्क्रज्ज्योतिश्च्च चित्त्रज्ज्योतिश्च्च सत्यज्ज्योतिश्च्च ज्ज्योतिष्ष्माँश्च्च ।। शुक्क्रश्च्च ऽऋतपाश्च्चात्यठँहाः ।। ब्रह्मेशानमध्ये शृङ्खलायाम् ।। ॐ भूर्भुवः स्वः दक्षादिसप्तगणेभ्यो नमः, दक्षादिसप्तगणानावाहयामि ।। २२ ।।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्च्चन ।। ससस्त्यश्श्वकः सुभद्द्रिकां काम्पीलवासिनीम् ।। ब्रह्मेन्द्रमध्ये वाप्याम् लिङ्गे वा ।। ॐ भूर्भुवः स्वः दुर्गायै नमः, दुर्गामावाहयामि ।। २३ ।।

ॐ इदं व्विष्ष्णुर्व्विचक्क्रमे त्त्रेधा निदधे पदम् ।। समूढमस्य पाꣳसुरे स्वाहा ।। तत्पूर्वे ।। ॐ भूर्भुवः स्वः विष्ष्णवे नमः, विष्ष्णुमावाहयामि ।। २४ ।।

पितृब्भ्यः स्वधायिब्भ्यः स्वधानमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः प्प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः ।। अक्षन्न्पितरोऽमीमदन्न्त पितरो ऽतीतृप्पन्न्त पितरः पितरः शुन्धद्द्ध्वम् ।। ब्रह्माग्निमध्ये शृंखलायाम् ।। ॐ भूर्भुवः स्वः स्वधायै नमः, स्वधामावाहयामि ।। २५ ।।

ॐ परं मृत्यो ऽअनु परेहि पन्न्थां य्यस्ते ऽअन्न्य इतरो देवयानात् ।। चक्षुष्ष्मते शृण्वते ते ब्ब्रवीमि मा नः प्प्रजाꣳरी-

रिषो मोत व्वीरान् ।। ब्रह्मयममध्ये वाप्यां लिङ्गे वा ।। ॐ मृत्युरोगेभ्यो नमः, मृत्युरोगानावाहयामि ।। २६ ।।

ॐ गणानां त्वा गणपतिठँ हवामहे प्प्रियाणां त्वा प्रियपतिठँ हवामहे निधीनां त्वा निधिपतिठँ हवामहे व्वसो मम ।। आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ।। १ ।। ब्रह्मनिर्ऋतिमध्ये श्रृङ्खलायाम् ।। ॐ गणपतये नमः, गणपतिमावाहयामि ।। २७ ।।

ॐ अप्प्स्वग्ग्ने सधिष्ष्ट्व सौषधीरनु रुध्यसे ।। गर्ब्भे सञ्जायसे पुनः ।। ब्रह्मवरुणमध्ये वाप्यां लिङ्गे वा ।। ॐ अद्भ्यो नमः, अपः आवाहयामि ।। २८ ।।

ॐ मरुतो यस्य हि क्षये पाथा दिवो व्विमहसः ।। स सुगोपातमो जनः ।। ब्रह्मवायुमध्ये श्रृंखलायाम् ।। ॐ भूर्भुवः स्वः मरुद्भ्यो नमः, मरुतः आवाहयामि ।। २९ ।।

ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी ।। यच्छा नः शर्म्म सप्प्रथाः ।। ब्रह्मणः पादमूले ।। ॐ भूर्भुवः स्वः पृथिव्यै नमः ।। पृथ्वीमावाहयामि ।। ३० ।।

ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।। सरस्वती तु पञ्चधा सो देशे ऽभवत्सरित् ।। तदुत्तरे ।। ॐ भूर्भुवः स्वः गङ्गादिनदीभ्यो नमः, गङ्गादिनदीनावाहयामि ।। ३१ ।।

ॐ समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूर्म्मयोभूरभि मा व्वाहि स्वाहा । मारुतोऽस मरुतां गणः शम्भूर्म्मयोभूरभि मा व्वाहि स्वाहा । अवस्यूरसि दुवस्वाञ्छम्भूर्म्मयोभूरभि मा व्वाहि स्वाहा ।। तदुत्तरे ।। ॐ भूर्भुवः स्वः सप्तसागरेभ्यो नमः, सप्तसागरानावाहयामि ।। ३२ ।।

ॐ प्र पर्व्वतस्य व्वृषभस्य पृष्ठ्ठान्नावश्च्चरन्ति स्वसिच ऽइयानाः ॥ ता ऽआववृत्रन्नधरागुदक्ता अहिर्ब्बुध्न्यमनु रीयमाणाः । व्विष्ण्णोर्व्विक्क्रमणमसि व्विष्ण्णोर्व्विक्क्रान्तमसि व्विष्ण्णोः क्क्रान्तमसि ॥ कर्णिकापरिधौ ॥ ॐ भूर्भुवः स्वः मेरवे नमः, मेरुमावाहयामि ॥ ३३ ॥

अथ सोमादिक्रमेण ॥ ॐ गणानां त्वा० ॥ सत्त्वबाह्यपरिधौ ॥ ॐ भूर्भुवः स्वः गदायै नमः ॥ गदामावाहयामि ॥३४॥

ॐ त्रिꣳशद्धाम व्विराजति व्वाक्क् पतङ्गाय धीयते ॥ प्रतिवस्तोरह द्युभिः ॥ ईशान्याम् ॥ ॐ भूर्भुवः स्वः त्रिशूलाय नमः, त्रिशूलमावाहयामि ॥ ३५ ॥

ॐ महाँ२ इन्द्रो व्वज्रहस्तः षोडशा शर्म्म यच्छतु ॥ हन्तु पाप्मानं योऽस्मान्द्द्वेष्टि ॥ उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥ पूर्वे ॥ ॐ भूर्भुवः स्वः वज्राय नमः, वज्रमावाहयामि ॥ ३६ ॥

ॐ व्वसु च मे व्वसतिश्श्च मे कर्म्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इत्याच मे गतिश्च मे यज्ञेन कल्प्पन्ताम् ॥ आग्नेय्याम् ॥ ॐ भूर्भुवः स्वः शक्तये नमः, शक्तिमावाहयामि ॥ ३७ ॥

ॐ इड ऽएह्यदित ऽएहि काम्म्य ऽएत ॥ मयि वः कामधरणं भूयात् ॥ दक्षिणे ॥ ॐ भूर्भुवः स्वः दण्डाय नमः, दण्डमावाहयामि ॥ ३८ ॥

ॐ खड्गो व्वैश्श्वदेवः श्श्वा कृष्ण्णः कर्ण्णो गर्द्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्श्वेषा देवानां पृषतः ॥ नैर्ऋत्याम् ॥ ॐ भूर्भुवः स्वः खड्गाय नमः, खड्गमावाहयामि ॥ ३९ ॥

ॐ उदुत्तमं व्वरुण पाशमस्म्मदवाधमं व्वि मध्यमꣳ श्रथाय ।। अथा व्वयमादित्य व्व्रते तवानागसो ऽअदितये स्याम ।। पश्चिमे ।। ॐ भूर्भुवः स्वः पाशाय नमः, पाशमावाहयामि ।। ४० ।।

ॐ अꣳशुश्च्च मे रश्म्मिश्च्च मेऽदाभ्यश्च्च मेऽधिपतिश्च्च मऽउपाꣳशुश्च्च मेऽन्न्तर्य्यामश्च्च मऽऐन्द्रवायवश्च्च मे मैत्त्रावरुणश्श्च मऽआश्श्विनश्श्च मे प्प्रतिप्प्रस्थानश्श्च मे शुक्क्रश्श्च मे मन्थी च मे यज्ञेन कल्प्पन्न्ताम् ।। वायव्याम् ।। ॐ भूर्भुवः स्वः अङ्कुशाय नमः, अङ्कुशमावाहयामि ।। ४१ ।।

ॐ आयं गौः पृश्निरक्रमीदसदन्न्मातरं पुरः ।। पितरञ्च प्प्रयन्त्स्वः ।। तद्वाह्ये उत्तरे रक्तपरिधौ सोमादिस्थापनम् ।। ॐ भूर्भुवः स्वः गौतमाय नमः, गौतममावाहयामि ।। ४२ ।।

ॐ अयं दक्षिणा व्विश्श्वकर्म्मा तस्य मनो व्वैश्श्वकर्म्मणं ग्रीष्म्मो मानसस्त्रिष्टुब्ग्ग्रैष्मी त्रिष्टुभः स्वारꣳस्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाज ऽऋषिः प्प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ।। ईशान्याम् ।। ॐ भूर्भुवः स्वः भरद्वाजाय नमः, भरद्वाजमावाहयामि ।। ४३ ।।

ॐ इदमुत्तरात्स्वतस्य श्श्रोत्त्रꣳसौवꣳ शरच्छ्रौत्र्यनुष्टुप् शारद्यनुष्टुभ ऽऐडमैडान्मन्थी मन्थिन ऽएकविꣳश ऽएकविꣳशाद्वैराजं व्विश्श्वामित्र ऽऋषिः प्प्रजापतिगृहीतया त्वया श्श्रोत्रं गृह्णामि प्प्रजाभ्यः ।। पूर्वे ।। ॐ भूर्भुवः स्वः विश्वामित्राय नमः, विश्त्रामित्रमावाहयामि ।। ४४ ।।

ॐ त्र्यायुषं ज्जमदग्ग्नेः कश्यपस्य त्र्यायुषम् ।। आग्नेय्याम् ।। ॐ भूर्भुवः स्वः कश्यपाय नमः, कश्यपमावाहयामि ।। ४५ ।।

ॐ अयं पश्श्चाद्द्विश्श्वव्व्यचास्तस्य चक्षुर्व्वैश्श्वव्व्यचसं व्वर्षाश्चाक्षुष्ष्यो जगती व्वार्षी जगत्या ऽऋक्क्समम्मृक्क्समाच्छुक्रः शुक्क्रात्सप्प्तदशः सप्प्तदशाद्द्वैरूपं ज्जमदग्ग्निर्ऋषिः प्प्रजापतिगृहीतया त्वया चक्षुर्ग्गृह्णामि प्प्रजाब्भ्यः ॥ दक्षिणे ॥ ॐ भूर्भुवः स्त्रः जमदग्नये नमः, जमदग्निमावाहयामि ॥ ४६ ॥

ॐ अयं पुरो भुवस्तस्य प्प्राणो भौवायनो व्वसन्तः प्प्राणायनो गायत्त्री व्वासन्ती गायत्र्यै गायत्रं गायत्त्रादुपाꣳ शुरुपाꣳ शोस्त्रिवृत्त्रिवृतो रथन्तरं व्वसिष्ठ ऽऋषिः प्प्रजापतिगृहीतया त्वया प्प्राणं गृह्णामि प्प्रजाब्भ्यः ॥ नैर्ऋत्याम् ॥ ॐ भूर्भुवः स्वः वसिष्ठाय नमः, वसिष्ठमावाहयामि ॥ ४७ ॥

ॐ अत्त्र पितरो मादयद्द्ध्वं य्यथाभागमावृषायद्ध्वम् ॥ अमीमदन्त पितरो यथाभागमावृषायिषत ॥ पश्चिमे ॥ ॐ भूर्भुवः स्वः अत्रये नमः, अत्रिमावाहयामि ॥ ४८ ॥

ॐ तं पत्नीभिरनुगच्छेम देवाः पुत्त्रैर्ब्भ्रातृभिरुत वा हिरण्ण्यैः ॥ नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽअधिरोचने दिवः ॥ वायव्याम् ॥ ॐ भूर्भुवः स्वः अरुन्धत्यै नमः, अरुन्धतीमावाहयामि ॥ ४९ ॥

तद्बाह्ये कृष्णपरिधौ पूर्वादिक्रमेण ॥ ॐ अदित्त्य रास्स्नासीन्द्राण्ण्या ऽउष्ष्णोषः ॥ पूषासि घर्म्माय दीष्ष्व ॥ पूर्वे ॥ ॐ भूर्भुवः स्वः ऐन्द्र्यै नमः ॥ ऐन्द्रीमावाहयामि ॥ ५० ॥

ॐ अम्बेऽअम्बिके० ॥ आग्नेय्याम् ॥ ॐ भूर्भुवः स्वः कौमार्य्यै नमः, कौमारीमावाहयामि ॥ ५१ ॥

ॐ इन्द्रायाहि धियेषितो व्विप्रजूतः सुतावतः ॥ उप ब्ब्रह्म्माणि व्वाग्घतः ॥ दक्षिणे ॥ ॐ भूर्भुवः स्वः ब्राह्म्यै नमः, ब्राह्मीमावाहयामि ॥ ५२ ॥

ॐ इन्द्रस्य क्क्रोडोऽदित्त्यै पाजस्यं दिशां जत्रवोऽदित्त्यै भसज्जीमूतान्न्हृदयौपशेनान्तरिक्ष पुरीतता नभ ऽउदर्य्येण चक्क्रवाकौ मतस्नाब्भ्यां दिवं व्वृक्काब्भ्यां गिरीन्न्प्लाशिभिरुपलान्न्प्लीन्न्हा व्वल्मीकान्न्क्लोमभिग्ग्लौभिग्गुल्म्मान्न्हिराभिः स्रवन्तोर्हृदान्न्कुक्षिब्भ्याꣳ समुद्द्रमुदरेण व्वैश्श्वानरं भस्स्मना ।। नैर्ऋत्याम् ।। ॐ भूर्भुवः स्वः वाराह्यै नमः, वाराहीमावाहयामि ।। ५३ ।।

ॐ अम्बे ऽअम्बिकेऽम्बालिके न मा नयति कश्श्चन ।। ससस्त्यश्श्वकः सुभद्द्रिकां काम्पीलवासिनीम् ।। पश्चिमे ।। चामुण्डायै नमः, चामुण्डामावाहयामि ।। ५४ ।।

ॐ आप्प्यायस्व समेतु ते व्विश्श्वतः सोम व्वृष्ण्यम् ।। भवाव्वाजस्य सङ्गथे ।। वायव्ये ।। ॐ भूर्भुवः स्वः वैष्णव्यै नमः ।। वैष्णवीमावाहयामि ।। ५५ ।।

ॐ या ते रुद्द्र शिवा तनूरघोरापापकाशिनो ।। तया नस्तन्न्वा शन्न्तमया गिरिशन्न्ताभिचाकशीहि ।। उत्तरे ।। ॐ भूर्भुवः स्वः माहेश्वर्य्यै नमः ।। माहेश्वरीमावाहयामि ।। ५६ ।।

ॐ समक्ख्ये देव्व्या धिया सन्दक्षिणयोरुचक्षसा ।। मा म आयुः प्प्रमोषीर्म्मो ऽअहं तव व्वीरं व्विदेय तव देवि सन्दृशि ।। ईशान्याम् ।। ॐ भूर्भुवः स्वः वैनायक्यै नमः ।। वैनायकीमावाहयामि ।। ५७ ।।

इति सर्वतोभद्रदेवतास्थापनक्रमः ।

—:o:—

* अथ श्रीशालग्राम-पूजनम् *

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।। स भूमिꣳ सर्वतस्स्पृत्वात्त्यतिष्ठद्दशांगुलम् ।। शालग्राममावाहयामि ।।

ॐ पुरुष एवेदꣳ सर्व्वं य्यद्भूतं य्यच्च भाव्यम् ।। उतामृतत्वस्येशानो यदन्नेनातिरोहति ।। आसनं समर्पयामि ।।

ॐ एतावानस्य महिमातो ज्यायाँश्च्च पूरुषः ।। पादोऽस्य विश्श्वा भूतानि त्त्रिपादस्यामृतं दिवि ।। पाद्यं समर्पयामि ।।

ॐ त्रिपादूर्द्ध्व ऽउदैत्पुरुषः पादो स्येहाभवत्पुनः ।। ततो व्विष्वङ् व्यक्क्रामत्साशनानशने ऽअभि ।। अर्घ्यं समर्पयामि ।।

ॐ ततो व्विराडजायत व्विराजो ऽअधि पूरुषः ।। स जातो ऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः ।। आचमनीयं जलं समर्पयामि ।।

ॐ तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्ज्यम् ।। पशूँस्ताँश्चक्क्रे वायव्यानारण्ण्या ग्ग्राम्याश्च्च ये ।। स्नानं समर्पयामि ।।

ॐ पयः पृथिव्व्यां पय ऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधाः ।। पयस्वतीः प्प्रदिशः सन्तु मह्यम् ।। दुग्धस्नानं समर्पयामि ।। पुनः शुद्धोदकस्नानं समर्पयामि ।।

ॐ दधिक्क्राव्णो ऽअकारिषं जिष्ष्णोरश्श्वस्य व्वाजिनः । सुरभि नो मुखाकरत्प्र ण ऽआयूꣳषि तारिषत् ।। दधिस्नानं समर्पयामि ।। पुनः शुद्धोदकस्नानं समर्पयामि ।।

ॐ घृतङ्घृतपावानः पिबत वसां वसापावानः । पिबतान्तरिक्षस्य हविरसि स्वाहा दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ।। घृत-स्नानं समर्पयामि ।। पुनः शुद्धोदकस्नानं समर्पयामि ।।

ॐ मधुव्वाता ऽऋतायते मधु क्षरन्न्ति सिन्धवः । माद्ध्वीर्न्नः सन्त्वोषधीः ।। मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता ।। मधुमान्नो व्वनस्प्पतिर्म्मधुमाँ ऽअस्तु सूर्य्यः । माद्ध्वीर्गावो भवन्तु नः ।। मधुस्नानं समर्पयामि ।। पुनः शुद्धोदकस्नानं समर्पयामि ।।

ॐ अपाꣳरसमुद्वयसठँसूर्ये सन्तठँ समाहितम् । अपाꣳ-

रसस्य यो रसस्तं व्वो गृह्णाम्म्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ।। शर्करास्नानं समर्पयामि ।। पुनः शुद्धोदकस्नानं समर्पयामि ।।

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ।। पंचामृतस्नानं समर्पयामि ।।

कावेरी नर्मदा वेणी तुङ्गभद्रा सरस्वती ।
गङ्गा च यमुना चैव ताभ्यः स्नानार्थमाहृतम् ।।
गृहाण त्वं रमाकान्त स्नानार्थं श्रद्धया जलम् ।।
शुद्धोदक-स्नानं समर्पयामि ।।

ॐ तस्म्माद्यज्ञात्सर्व्वहुतऽऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। वस्त्रोपवस्त्रं समर्पयामि ।। आचमनीयं जलं समर्पयामि ।।

ॐ तस्म्मादश्श्वा ऽअजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जाता ऽअजावयः ।। यज्ञोपवीतं समर्पयामि ।। आचमनीयं जलं समर्पयामि ।।

दधिमध्वाज्यसंयुक्तं पात्रयुग्मसमन्वितम् ।।
मधुपर्कं गृहाण त्वं वरदो भव शोभन ।।
मधुपर्कं समर्पयामि ।। आचमनीयं जलं समर्पयामि ।।

ॐ तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्ग्रतः । तेन देवा ऽअजयन्त साद्ध्या ऋषयश्च ये ।। गन्धं समर्पयामि ।।

ॐ अक्षन्नमीमदन्त ह्यवप्रिया ऽअधूषत ।। अस्तोषत स्वभानवो व्विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ।। अक्षतान् समर्पयामि ।।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।। समूढमस्य पाꣳसुरे स्वाहा ।। पुष्पाणि समर्पयामि ।।

ॐ ओषधीः प्प्रतिमोदद्ध्वम्पुष्पवतीः प्रसूवरीः । अश्वा ऽइवसजित्त्वरीर्व्वीरुधः पारयिष्णवः ।। पुष्पमालां समर्पयामि ।।

ॐ यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्पयन् ।। मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा ऽउच्च्येते ।। १ ।। तुलसीपत्रं समर्पयामि ।।

तुलसीं हेमरूपां च रत्नरूपाञ्च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ।। २ ।। तुलसीपत्रं समर्पयामि ।।

ॐ विष्णोः कर्माणि पश्यत यतो व्व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ।। ३ ।। तुलसी-पत्रं समर्पयामि ।।

तुलसी-बिल्व-निम्बैश्च जम्बीरैरामलैः शुभैः ।
पञ्चबिल्वमिति ख्यातं प्रसीद परमेश्वर ।।
बिल्वपत्राणि समर्पयामि ।।

विष्ण्वादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा ।
क्षीरसागरसंभूते वंशवृद्धिकरी भव ।। दूर्वाङ्कुरान् समर्पयामि ।।

शमी शमयते पापं शमी शत्रुविनाशिनी ।।
धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी ।। शमीपत्रं समर्पयामि ।।

ॐ रत्न-कङ्कण वैदूर्य-मुक्ता-हारादिकानि च ।।
सुप्रसन्नेन मनसा दत्तानि स्वीकुरुष्व भोः ।। आभूषणं समर्पयामि ।।

नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम् ।
अबीरनामकं चूर्णं गन्धं चारु प्रगृह्यताम् ।। अबीरं समर्पयामि ।।

ॐ तैलानि च सुगन्धीनि द्रव्याणि विविधानि च।
मया दत्तानि लेपार्थं गृहाण परमेश्वर ॥
सुगन्धिततैलं समर्पयामि ॥

ॐ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्याँ शूद्रो ऽअजायत ॥ १ ॥ धूपमाघ्रापयामि ॥

ॐ धूरसि धूर्व्व धूर्व्वन्तं धूर्व्वतं य्योऽस्म्मान् धूर्व्वति तं धूर्व्वयं व्वयं धूर्व्वामः। देवानामसि व्वह्नितमठं सस्नितमं पप्रितमं जुष्टतमन्देवहूतमम् ॥ २ ॥ पुनः धूपमाघ्रापयामि ॥

ॐ चन्द्रमा मनसो जातश्श्चक्षोः सूर्य्यो ऽअजायत ॥ श्श्रोत्त्राद्वायुश्श्च प्प्राणश्श्च मुखादग्निरजायत ॥ दीपं दर्शयामि ॥ हस्तप्रक्षालनम् ॥

प्राणाय स्वाहा ॥ अपानाय स्वाहा ॥ व्यानाय स्वाहा ॥ उदानाय स्वाहा ॥ समानाय स्वाहा ॥

ॐ नाभ्या ऽआसीदन्तरिक्षठं शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्द्दिशः श्श्रोत्त्रात्तथा लोकाँ२ ऽअकल्पयन् ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ व्वसन्तो स्यासीदाज्ज्यं ग्ग्रीष्म ऽइध्मः शरद्धविः ॥ सप्प्तास्यासन्न्परिधयस्त्रिः सप्प्त समिधः कृताः ॥ देवा यद्यज्ञन्तन्न्वाना ऽअबध्नन्न्पुरुषम्पशुम् ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्न्यासन्। ते ह नाकम्महिमानः सचन्त यत्त्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च व्विश्वकर्मणः समवर्त्तताग्ग्रे। तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्ग्रे ॥ वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव व्विदित्वातिमृत्युमेति नान्यः पन्था व्विद्यतेऽयनाय ॥

प्रज पतिश्चरति गर्भे ऽअन्तरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ।। यो देवेभ्य ऽआतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ।। रुचं ब्राह्मञ्जनयन्तो देवा ऽअग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा ऽअसन्वशे ।। श्रीश्च्च ते लक्ष्मीश्च्च पत्न्यावहोरात्त्रे पार्श्वे नक्षत्त्राणि रूपमश्विनौ व्व्यात्तम् । इष्णन्निषाणामुम्म ऽइषाण सर्व्वंलोकम्म ऽइषाण ।। नैवेद्यं निवेदयामि ।।

एलोशीर-लवङ्गादि-कर्पूरपरिवासितम् ।।
प्राशनार्थं कृतं तोयं गृहाण परमेश्वर ।। मध्ये पानीयं समर्पयामि ।।

बीजपूराम्र-पनस-खर्जूरी-कदली फलम् ।
नारिकेलफलं दिव्यं गृहाण परमेश्वर ।। ऋतुफलान् समर्पयामि ।।

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।

आचमनीयं जलं समर्पयामि ।।

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मात् फलप्रदानेन पूर्णाः सन्तु मनोरथाः ।।

अखंडऋतुफलान् समर्पयामि ।।

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म ऽइध्मः शरद्धविः ।।

ताम्बूलपूगीफलं समर्पयामि ।।

पूजाफलसमृद्ध्यर्थं दक्षिणा च तवाग्रतः ।
स्थापिता तेन मे प्रीतः पूर्णान् कुरु मनोरथान् ।। दक्षिणाद्रव्यं समर्पयामि ।।

आर्त्तिक्यम् ।

कदलीगर्भसम्भूतं कर्पूरन्तु प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ।।

विष्णु–स्तुतिः ।

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकांतं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।। १ ।।
आदौ देवकिदेवगर्भजननं गोपीगृहे वर्द्धनम्
मायापूतनजीवितापहरणं गोवर्द्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं कुन्तीसुतापालनम्
एतद्भागवतं पुराणकथितं श्रीकृष्णलीलामृतम् ।। २ ।।
कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभम्
नासाग्रे वरमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं कण्ठे च मुक्तावली
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ।। ३ ।।
फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियम् ।
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतम्
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ।। ४ ।।
आदौ पाण्डवधार्तराष्ट्रजननं लाक्षागृहे दाहनम्
द्यूतस्त्रीहरणं वने विचरणं मत्स्यालयावेधनम् ।
लीलागोहरणं रणे विचरणं सन्ध्याक्रियावर्धनम्
पश्चाद्भीष्मसुयोधनादि हननमेतन्महाभारतम् ।। ५ ।।

मत्स्याऽश्व–कच्छप–नृसिंहवराह–हंस–राजन्य–विप्र–विबुधेषु कृतावतारः ।। त्वं पालनस्त्रिभुवनश्च यथाधुनेश ! भारं भुवो हर यदूत्तम ! वन्दनं ते ।।

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितञ्च सत्ये ।।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्ना ।।७।।

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ।।८।।

मूकं करोति वाचालं पङ्गुं लंघयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ।। ९ ।।

पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां पुण्डरीकाक्ष सर्वपापहरो भव ।। १० ।।

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ।। ११ ।।

अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ।। १२ ।।

एकोऽपि कृष्णश्च कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ।।१३।।

पुष्पाञ्जलिः ।।

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।। ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान् कामकामाय मह्यम् कामेश्वरो वैश्रवणो ददातु ।। कुबेराय वैश्रवणाय महाराजाय नमः ।। ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यराज्यं महाराजमाधिपत्यमयं समन्तपर्यायी

स्यात् ।। सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति । (तदप्येष श्लोकोऽभिगीतो) मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदः ।। पुष्पांजलिं समर्पयामि ।। ॐ व्विश्वतश्चक्षुरुत व्विश्वतोमुखो व्विश्वतो बाहुरुत व्विश्श्वतस्पात् । सं बाहुभ्यान्धमति संपतत्रै द्द्यावाभूमी जययन्देव ऽएकः ।

कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वानुसृतस्वभावात् । करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ।।

प्रदक्षिणा ।

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाᳪ सहस्रयोजनेऽव धन्वानि तन्मसि ।।

क्षमा-प्रार्थना ।

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव ! परिपूर्णं तदस्तु मे ।।
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ।। सर्वेभ्यो देवेभ्यो नमः ।।

—:०:—

अथ योगिनीपूजनम् ।

अथाऽऽग्नेय्यां वेद्यां योगिनीं पूजयेत् ।।

वेद्युपरि वस्त्रं प्रसार्य पूर्वापरायता दक्षिणोत्तरायताश्च नव रेखाः कार्याः ।। एवं कृते चतुःषष्ठिकोष्ठानि भवन्ति ।। तस्योपरि त्रीणि त्रिकोणानि कृत्वा त्रिषु त्रिकोणेषु क्रमेण दक्षिणत आरभ्योदगन्ता कलशं प्रतिष्ठाप्य तस्योपरि महाकालीं, महालक्ष्मीं, महासरस्वतीं च पूजयेत् । ततः चतुःषष्टिपदेषु प्रतिकोष्ठे चित्रविचित्रतण्डुलैः त्रिकोणं कृत्वा चतुःषष्टियोगिनीः प्रागन्ता उदगन्ता वा पूजयेत् ।। तद्यथा ।। आचम्य प्राणानायम्य ।। देशकालौ संकीर्त्य

गोत्रः शर्मा सपत्नीकोऽहम् अस्मिन् प्रतिष्ठाख्ये कर्मणि महाकाली-महालक्ष्मी-महासरस्वती—पूजनपूर्वक—दिव्यादि—चतुःषष्टियोगिनीनां स्थापनं पूजनं च करिष्ये ।। ततो योगिनीवेद्युपरि पूर्वतः उदगन्ता स्थापनविधिना त्रीन् कलशान् स्थापयेत् ।। तस्योपरि अग्न्युत्तारण-पूर्विकां स्वर्णमयीं महाकाली-महालक्ष्मी-महासरस्वतीप्रतिमां स्थापयेत् ।। तत्र मन्त्राः ।।

ॐ अम्बेऽअम्बिकेम्बालिके न मा नयति कश्श्चन ।। स सत्यश्शबकः सुभद्द्रिकाङ्काम्पीलवासिनीम् ।।

खड्गं चक्र-गदेषुचाप-परिघान् शूलं भुशुण्डीं शिरः
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ।।

ॐ भूर्भुवः स्वः महाकाल्यै नमः, महाकालीमावाहयामि स्थापयामि ।। १ ।। तदुत्तरे ।।

ॐ श्रीश्च्च ते लक्ष्मीश्च्च पत्न्यावहोरात्त्रे पाश्श्वे नक्षत्त्राणि रूपमश्श्विनौ व्यात्तम् ।। इष्ण्णन्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ।।

अक्ष-स्रक्-परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां
दण्डं शाक्तमसिञ्च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ।।

ॐ भूर्भुवः स्वः महालक्ष्म्यै नमः, महालक्ष्मीमावाहयामि स्थापयामि ।। २ ।। तदुत्तरे ।। ॐ पावका नः सरस्वती० ।।

घण्टा-शूल-हलानि शङ्ख-मुशले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ।
गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महा
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ।।

ॐ भूर्भुवः स्वः महासरस्वत्यै नमः, महासरस्वतीमावाहयामि स्थापयामि ॥ ३ ॥

ततः चतुःषष्टियोगिनीः प्रागन्ता वा आत्राहयेत् ॥ तत्राऽऽवाहनमन्त्राः ॥

ॐ तमीशानं जगतस्तस्थुषस्प्पतिं धियञ्जिन्वमवसे हूमहे व्वयम् । पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

आवाहयामि तां देवीं दिव्यानाम्नेति विश्रुताम् ।
यजमानहितार्थाय कोष्ठे चाद्यं प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः दिव्ययोगिन्यै नमः, दिव्ययोगिनीमावाहयामि स्थापयामि ॥ १ ॥

ॐ आ ब्रह्मन्ब्राह्मणो ब्ब्रह्मवर्च्चसी जायतामा राष्ट्रे राजन्न्यः शूर ऽइषव्व्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्ध्रिर्य्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतां निकामे निकामे नः पर्ज्जन्यो व्वर्षतु फलवत्यो न ऽओषधयः पच्च्यन्तां योगक्षेमो नः कल्पताम् ॥

आवाहयामि तां देवीं महाशब्देति विश्रुताम् ।
सर्वसिद्धिप्रदां पूज्यां कोष्ठे चैव द्वितीयके ॥

ॐ भूर्भुवः स्वः महायोगिन्यै नमः, महायोगिनीमावाहयामि स्थापयामि ॥ २ ॥

ॐ महाँ२ ऽइन्द्रो व्वज्ज्रहस्तः षोडशी शर्म्म यच्छतु हन्तु पाप्मानं य्योऽस्म्मान्द्वेष्टि । उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥

आवाहयामि तां देवीं सिद्धिपूर्वेति विश्रुताम् ।
महासिद्धिकरां देवीं पूज्या कोष्ठे तृतीयके ॥

ॐ भूर्भुवः स्वः सिद्धियोगिन्यै नमः, सिद्धियोगिनीमावाहयामि स्थापयामि ॥ ३ ॥

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरञ्च प्रयन्त्स्वः ॥

आवाहयामि तां देवीं माहेश्वरीति वा स्वयम् ।
यजमानहितार्थाय पूज्या कोष्ठे चतुर्थके ॥

ॐ माहेश्वर्य्यै नमः, माहेश्वरीमावाहयामि स्थापयामि ॥४॥

ॐ आदित्यं गर्भं पयसा समङ्‌धि सहस्रस्य प्प्रतिमां व्विश्वरूपम् । परिवृङ्‌धि हरसा माभिमँस्थाः शतायुषं कृणुहि चीयमानः ॥

आवाहयामि तां देवीं प्रेताक्षी नाम विश्रुताम् ।
महाभयहरीं देवीं पूजयेत् पञ्चमे दले ॥

ॐ भूर्भुवः स्वः प्रेताक्ष्यै नमः, प्रेताक्षीमावाहयामि स्थापयामि ॥ ५ ॥

ॐ स्वर्णघर्म्मः स्वाहा स्वाहा स्वर्णार्क्कः स्वाहा स्वर्णशुक्क्रः स्वाहा स्वर्णज्जोतिः स्वाहा स्वर्णसूर्य्यः स्वाहा ॥

आवाहयामि तां देवीं डाकिनी नाम विश्रुताम् ॥
सर्वरोगहरां देवीं षष्ठे कोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः डाकिन्यै नमः, डाकिनीमावाहयामि स्थापयामि ॥ ६ ॥

ॐ सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे विश्वञ्च मे महश्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ॥

आवाहयामि तां देवीं कालीं किल बलप्रदाम् ।
प्रसन्नां सर्वकाले च पूजयेत् सप्तमे दले ॥

ॐ भूर्भुवः स्वः काल्यै नमः, कालीमावाहयामि स्थापयामि ॥ ७ ॥

ॐ भाये दार्व्वाहारं प्रभाया ऽअग्न्येधं ब्रध्नस्य व्विष्टपायाभिषेक्तारं व्वर्षिष्ठ्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्प्रकरितारं सर्व्वेभ्यो लोकेभ्य ऽउपसेक्तारमव ऽऋत्यै व्वधायो प्रमन्थितारं मेधाय व्वासः पल्पूलीं प्रकामाय रजयित्रीम् ॥

आवाहयामि तां देवीं कालरात्रीति विश्रुताम् ।
सर्वदा सुखदां देवीं कोष्ठे वाऽष्टमिते तथा ॥

ॐ भूर्भुवः स्वः कालरात्र्यै नमः, कालरात्रीमावाहयामि स्थापयामि ॥ ८ ॥ [इति प्रथमाष्टकपंक्तिः ।]

ॐ जिह्वा मे भद्द्रं व्वाङ्महो मनो मन्न्युः स्वराड् भामः । मोदाः प्प्रमोदा ऽअङ्गुलीरङ्गानि मित्त्रं मे सहः ॥

आवाहयामि तां देवीं निशाकरीति विश्रुताम् ।
यजमानहितार्थाय पूजयेत् प्रथमे दले ॥

ॐ भूर्भुवः स्वः निशाकर्य्यै नमः, निशाकरीमावाहयामि स्थापयामि ॥ १ ॥

ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्क्रन्दाय स्वाहा प्प्रोथते स्वाहा प्प्रप्प्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा व्वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्ग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा व्विजृम्भमाणाय स्वाहा व्विचृताय स्वाहा । सꣳहानाय स्वाहोपस्त्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ॥

आवाहयामि तां देवीं हुङ्कारी नाम विश्रुताम् ।
यजमानहितार्थाय पूज्या कोष्ठे द्वितीयके ॥

ॐ भूर्भुवः स्वः हुङ्कार्य्यै नमः, हुङ्कारीमावाहयामि स्थापयामि ॥ २ ॥

ॐ अग्निश्च मे घर्म्मंश्च मेऽर्क्कंश्च मे सूर्य्यंश्च्च मे प्प्राणश्च्च मेऽश्श्वमेधश्च्च मे पृथिवी च मेऽदितिश्च्च मे दितिश्च मे द्यौश्च्च मे ऽङ्गुलयः शक्क्वरयो दिशश्च्च मे यज्ञन कल्प्पन्ताम् ॥

आवाहयामि तां देवीं सिद्धिवैतालिकां शुभाम् ।
यज्ञसिद्धिकरां देवीं पूजयेत्तां तृतीयके ॥

ॐ भूर्भुवः स्वः सिद्धिवैतालिकायै नमः, सिद्धिवैतालिकामावाहयामि स्थापयामि ॥ ३ ॥

ॐ पूषन् तव व्व्रते व्वयं न रिष्येम कदाचन । स्तोतारस्तऽइह स्म्मसि ॥

आवाहयामि तां देवीं ह्लींकारी नाम विश्रुताम् ।
यजमानहितार्थाय पूज्या कोष्ठे चतुर्थके ॥

ॐ भूर्भुवः स्वः ह्लींकार्य्यै नमः, ह्लींकारीमावाहयामि स्थापयामि ॥ ४ ॥

ॐ व्वेद्या व्वेदिः समाम्यते ब्बर्हिषा बर्हिरिन्द्रियम् ॥ यूपेन यूप ऽआप्याते प्प्रणीतो ऽअग्निरग्निना ॥

आवाहयामि तां देवीं नामतो भूतडामराम् ।
भूतरक्षाकरीं देवीं पूजयेत् पञ्चमे दले ॥

ॐ भूर्भुवः स्वः भूतडामरायै नमः भूतडामरामावाहयामि स्थापयामि ॥ ५ ॥

ॐ अयमग्निः सहस्रिणो व्वाजस्य शतिनस्प्पतिः । मूर्द्धा कवी रयीणाम् ॥

आवाहयामि तां देवीमूर्ध्वकेशीति विश्रुताम् ।
सर्वशत्रुविनाशाय षष्ठे कोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः ऊर्ध्वकेश्यै नमः, ऊर्ध्वकेशीमावाहयामि स्थापयामि ।। ६ ।।

ॐ इमं मे व्वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ।।

आवाहयामि तां देवीं विरूपाक्षीति विश्रुताम् ।
यजमानहितार्थाय पूजयेत् सप्तमे दले ।।

ॐ भूर्भुवः स्वः विरूपाक्ष्यै नमः, विरूपाक्षीमावाहयामि स्थापयामि ।। ७ ।।

ॐ यमाय यमसूमर्व्वभ्योऽवतोकाꣳसंव्वत्सराय पर्य्यायिणीं परिवत्सरायाविजातामिदावत्सराया तोत्वरोमिद्द्वत्सरायातिष्कद्वरीं मत्सराय व्विजर्जराꣳसंव्वत्सराय पलिक्क्नीमृभुभ्योऽजिनसन्धठँ साद्धयेभ्यश्च्चर्म्मम्म्नम् ।।

आवाहयामि तां देवीं शुष्काङ्गीनामतः शुभाम् ।
सर्वकार्यकरां देवीं कोष्ठे चैव तथाऽष्टमे ।।

ॐ भूर्भुवः स्वः शुष्काङ्ग्यै नमः, शुष्काङ्गीमावाहयामि स्थापयामि ।। ८ ।। [इति द्वितीयाष्टकपङ्क्तिः]

ॐ असि यमो अस्यादित्यो ऽअर्व्वन्नसि त्रितो गुह्येन व्व्रतेन । असि सोमेन समया व्विपृक्त ऽआहुस्ते त्रीणि दिवि बन्धनानि ।।

आवाहयामि तां देवीं सुप्रीतां नरभोजनीम् ।
सुमखे यजमानस्य पूजयेत् प्रथमे दले ।।

ॐ भूर्भुवः स्वः नरभोजन्यै नमः, नरभोजनीमावाहयामि स्थापयामि ।। १ ।।

ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि । द्युम्नं चित्रश्रवस्तमम् ।।

आवाहयामि तां देवीं फेत्कारीनामतो मताम् ।
यज्ञे विघ्नहरां देवी पूज्या कोष्ठे द्वितीयके ॥

ॐ भूर्भुवः स्वः फेत्कार्यै नमः, फेत्कारीमावाहयामि स्थापयामि ॥ २ ॥

ॐ अग्रे बृहन्नुषसा मूर्द्ध्वो ऽअस्त्थान्नज्जगन्वान्तमसो ज्ज्योतिषागात् । अग्निर्ब्भानुना रुशता स्वङ्ग ऽअजातो व्विश्श्वा सद्मान्यप्प्राः ॥

आवाहयामि तां देवीं वीरभद्रेति विश्रुताम् ।
वीरभद्रकरीं देवीं पूजयेच्च तृतीयके ॥

ॐ भूर्भुवः स्वः वीरभद्रायै नमः, वीरभद्रमावाहयामि स्थापयामि ॥ ३ ॥

ॐ भग प्प्रणेतर्भग सत्यराधो भगेमान्धियमुदवाददन्नः ॥ भग प्प्र नो जनय गोभिरश्श्वैर्भग प्प्र नृभिर्नृवन्तः स्याम ॥

आवाहयामि तां देवीं धूम्राक्षीं धूम्रलोचनाम् ।
यजमानहितार्थाय पूज्या कोप्ठे चतुर्थके ॥

ॐ भूर्भुवः स्वः धूम्राक्ष्यै नमः, धूम्राक्षीमावाहयामि स्थापयामि ॥ ४ ॥

ॐ सुपर्णोसि गरुत्मांस्त्रिवृते शिरो गायत्त्रं चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमे ऽआत्त्मा छन्दाꣳस्यङ्गानि यजूꣳषि नाम । साम ते तनूर्व्वामदेव्व्य य्यज्ञा यज्ञियं पुच्छं धिष्ष्ण्याः शफाः सुपर्णोसि गरुत्मान्दिवं गच्छ स्वः पत ॥

आवाहयामि तां देवीं सुपूज्यां कलहप्रियाम् ।
यज्ञदोषहरां देवीं पूजयेत् पञ्चमे दले ॥

ॐ भूर्भुवः स्वः कलहप्रियायै नमः, कलहप्रियामावाहयामि स्थापयामि ॥ ५ ॥

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ।। अक्षन्पितरोऽमी मदन्त पितरो तीतृपन्त पितरः पितरः शुन्धध्वम् ।।

आवाहयामि तां देवीं राक्षसीं राक्षसप्रियाम् ।
रक्षार्थं यजमानस्य षष्ठे कोष्ठे प्रपूजयेत् ।।

ॐ भूर्भुवः स्वः राक्षस्यै नमः राक्षसीमावाहयामि स्थापयामि ।। ६ ।।

ॐ वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्त्थो व्वरुणस्य ऋतसदन्न्यसि व्वरुणस्य ऽऋत सदनमसि व्वरुणस्य ऽऋतसदन मासीद ।।

आवाहयामि तां देवीं रक्ताक्षीं घोरपूर्वकाम् ।
महाभयकरां देवीं पूजयेत् सप्तमे दले ।।

ॐ भूर्भुवः स्वः घोररक्ताक्ष्यै नमः, घोररक्ताक्षीमावाहयामि स्थापयामि ।। ७ ।।

ॐ व्वरुणः प्प्राविता भुवन्मित्त्रो व्विश्श्वाभिरुतिभिः ।। करतान्नः सुराधसः ।।

आवाहयामि तां देवीं विशालाक्षीति विश्रुताम् ।
विशालां सर्वकार्येषु कोष्ठे चैव तथाऽष्टके ।।

ॐ भूर्भुवः स्वः विशालाक्ष्यै नमः, विशालाक्षीमावाहयामि स्थापयामि ।। ८ ।। [इति तृतीयाष्टकपंक्तिः ।।]

ॐ हꣳ सः शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्द्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजा ऽअद्रिजा ऽऋतम्बृहत् ।।

आवाहयामि तां देवीं कौमारीं चैव विश्रुताम् ।
वरपुष्टिकरां देवीं पूजयेत् प्रथमे दले ।।

ॐ भूर्भुवः स्वः कौमार्यै नमः, कौमारीमावाहयामि स्थापयामि ॥ १ ॥

ॐ सुसन्दृशन्त्वा व्वयमघवन्वन्द्विषीमहि । प्रनूनं पूर्णबन्धुरस्तुतो यासि वशाँ२ ऽअनुयोजान्विन्द्र ते हरी ॥

आवाहयामि तां देवीं नाम्ना चण्डीं च विश्रुताम् ।
अभयां सर्वभक्तानां पूजयेद् द्वितये दले ॥

ॐ भूर्भुवः स्व चण्ड्यै नमः, चण्डीमावाहयामि स्थापयामि ॥ २ ॥

ॐ प्रतिपदसि प्प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पद त्वा तेजोऽसि तेजसे त्वा ॥

आवाहयामि तां देवीं वाराहीनाम विश्रुताम् ।
पुत्रपौत्रसुखार्थाय पूजयेत्तां तृतीयके ॥

ॐ भूर्भुवः स्वः वाराह्यै नमः, वाराहीमावाहयामि स्थापयामि ॥ ३ ॥

ॐ देवीरापो ऽअपान्नपाद्यो व ऽऊर्म्मिर्हविष्ष्य ऽइन्द्रियावान्मदिन्तमः । तं देवेभ्यो देवत्रा दत्तशुक्क्रपेभ्यो येषां भागस्थ स्वाहा ॥

आवाहयामि तां देवीं मुण्डधारिणिविश्रुताम् ।
सर्वशत्रविनाशाय तुर्ये कोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः मुण्डधारिण्यै नमः, मुण्डधारिणीमावाहयामि स्थापयामि ॥ ४ ॥

ॐ देवी द्द्वारो ऽअश्विना भिषजेन्द्रे सरस्वती । प्राणं न व्वीर्य्यं नसि द्द्वारो दधुरिन्द्रियं व्वसुवने व्वसुधे यस्य व्वन्तु यज ॥

आवाहयामि तां देवीं भैरवीं भैरवप्रियाम् ।
यजमानहितार्थाय पूजयेत् पञ्चमे दले ॥

ॐ भूर्भुवः स्वः भैरव्यै नमः, भैरवीमावाहयामि स्थापयामि ।। ५ ।।

ॐ देवी जोष्ट्री सरस्वत्यश्विनेन्द्रमवर्द्धयन् । श्रोत्त्रं न कर्ण्णयोर्य्यशो जोष्ट्रीब्भ्यां दधुरिन्द्रियं व्वसुवने व्वसुधे यस्य व्व्यन्तु यज ।।

आवाहयामि तां देवीं वीरां वीरबलप्रदाम् ।
वीरपुष्टिकरीं देवीं षष्ठे कोष्ठे प्रपूजयेत् ।।

ॐ भूर्भुवः स्वः वीरायै नमः, वीरामावाहयामि स्थापयामि ।। ६ ।।

ॐ देवस्य त्वा सवितुः प्रसवे ऽश्श्विनो ब्बाहुब्भ्यां पूष्णो हस्ताब्भ्याम् । अश्श्विनोर्भैषज्ज्येन तेजसे ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै भैषज्ज्येन व्वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्श्रियै यशसे ऽभिषिञ्चामि ।।

आवाहयामि तां देवीं नाम्ना चैव भयङ्करीम् ।
अभयां सर्वभक्तानां पूजयेत् सप्तमे दले ।।

ॐ भूर्भुवः स्वः भयङ्कर्यै नमः, भयङ्करीमावाहयामि स्थापयामि ।। ७ ।।

कदाचन स्तरीरसि नेन्द्रसश्चसि दाशुषे । उपोपेन्नु मघवन्भूय ऽइन्नु ते दानं देवस्य पृच्यन्ते ।।

आवाहयामि तां देवीं वज्रिणीं वज्रधारिणीम् ।
इन्द्रप्रियां महादेवीं पूजयेदष्टमे दले ।।

ॐ भूर्भुवः स्वः वज्रधारिण्यै नमः, वज्रधारिणीमावाहयामि स्थापयामि ।। ८ ।। [इति चतुर्थाष्टकपङ्क्तिः] ।

ॐ भद्द्रं कर्णेभिः श्रृणुयाम देवा भद्द्रं पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्व्यशेमहि देवहितं य्यदायुः ।।

आवाहयामि तां देवीं क्रोधा नाम्नेति विश्रुताम् ।
वैरिणामुपरि क्रुद्धां पूजयेत् प्रथमे दले ॥

ॐ भूर्भुवः स्वः क्रोधायै नमः, क्रोधामावाहयामि स्थापयामि ॥ १ ॥

ॐ इषे त्वोर्ज्जे त्वा व्वायव स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ट्ठतमाय कर्म्मण ऽआप्प्यायद्ध्वमघ्न्या ऽइन्द्राय भागं प्रजावतीरनमीवा ऽअयक्ष्मा मा वस्तेन ऽईशत माघशर्ठंसो द्ध्रुवा ऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥

आवाहयामि तां देवीं दुर्मुखां सुमुखप्रियाम् ।
सर्वविघ्नहरां देवीं पूज्या कोष्ठे द्वितीयके ॥

ॐ भूर्भुवः स्वः दुर्मुख्यै नमः, दुर्मुखीमावाहयामि स्थापयामि ॥ २ ॥

ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राद्ध्यासं देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ॥

आवाहयामि तां देवीं नाम्ना वै प्रेतवाहिनीम् ।
सर्वरोगहरां देवीं पूज्या कोष्ठे तृतीयके ॥

ॐ भूर्भुवः स्वः प्रेतवाहिन्यै नमः, प्रेतवाहिनीमावाहयामि स्थापयामि ॥ ३ ॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न ऽआसुव ॥

आवाहयामि तां देवीं कर्का नामेति विश्रुताम् ।
यजमानहितार्थाय पूज्या कोष्ठे चतुर्थके ॥

ॐ भूर्भुवः स्वः कर्कायै नमः, कर्कामावाहयामि स्थापयामि ॥ ४ ॥

ॐ असुन्न्वन्तमयजमानमिच्छस्तेन स्येत्यामन्न्विहिं तस्क्करस्य । अन्न्यमस्म्मदिच्छ सा त ऽइत्या नमो देवि निर्ऋते तुब्भ्यमस्तु ॥

आवाहयामि तां देवीं दीर्घलम्बोष्ठपूर्विकाम् ।
यजमानहितार्थाय पूज्या सा पञ्चमे दले ॥

ॐ भूर्भुवः स्वः दीर्घलम्बोष्ठ्यै नमः, दीर्घलम्बोष्ठीमावाहयामि स्थापयामि ॥ ५ ॥

ॐ अग्निश्च मे घर्म्मश्च मे र्क्कश्च मे सूर्य्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मे दितिश्च मे द्यौश्च मेऽङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥

आवाहयामि तां देवीं मालिनीं गणशालिनीम् ।
रूप-लावण्यसंयुक्तां षष्ठे कोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः मालिन्यै नमः मालिनीमावाहयामि स्थापयामि ॥ ६ ॥

ॐ बह्वीनां पिता ब्बहुरस्य पुत्त्रश्चिच्चश्च्चाकृणोति समनावगत्य । इषुधिः सङ्काः पृतनाश्च्च सर्व्वाः पृष्ठे निनद्धो जयति प्प्रसूतः ॥

आवाहयामि तां देवीं योगिनीं मन्त्रपूर्विकाम् ।
सिद्ध्यर्थं मन्त्रबीजानां पूजयेत्सप्तमे दले ॥

ॐ भूर्भुवः स्वः मन्त्रयोगिन्यै नमः, मन्त्रयोगिनीमावाहयामि स्थापयामि ॥ ७ ॥

ॐ नमस्ते रुद्र मन्न्यव ऽउतोत ऽइषवे नमः । बाहुब्भ्यामुत ते नमः ॥

आवाहयामि तां देवीं कालाग्निमग्निमोहिनीम् ।
सुखहर्षप्रदां देवीं पूज्या सा चाऽष्टमे दले ॥

ॐ भूर्भुवः स्वः कालाग्निमोहिन्यै नमः, कालाग्निमोहिनीमावाहयामि स्थापयामि ॥ ८ ॥ [इति पञ्चमाष्टकपङ्क्तिः ।]

ॐ ऋतञ्च मे ऽमृतञ्च मे ऽयक्ष्मञ्च मे ऽनामयच्च मे जीवातुश्श्च मे दीर्घायुत्वं च मे ऽनमित्रञ्च मे ऽभयञ्च मे सुखञ्च मे शयनञ्च मे सूखाश्च मे सुदिनञ्च मे यज्ञेन कल्प्पन्ताम् ॥

आवाहयामि तां देवीं मोहिनीं विश्वमोहिनीम् ।
यजमानहितार्थाय पूज्या तु प्रथमे दले ॥

ॐ भूर्भुवः स्वः मोहिन्यै नमः, मोहिनीमावाहयामि स्थापयामि ॥ १ ॥

ॐ ते आचरन्ती समनेव योषा मातेव पुत्त्रं विभृतामुपस्त्थे । अप शत्त्रूँ न्न्विद्ध्यताँ सम्विदाने ऽआर्त्त्नी ऽइमे व्विप्प्फुरन्ती आमित्त्रान् ॥

आवाहयामि तां देवीं चक्रा नामेति विश्रुताम् ।
नित्यं शत्रुगणे वक्रां पूजयेत्तां द्वितीयके ॥

ॐ भूर्भुवः स्वः चक्रायै नमः, चक्रामावाहयामि स्थापयामि ॥ २ ॥

ॐ वेद्या व्वेदिः समाप्यते वर्हिषा वर्हिरिन्द्रियम् । यूपेन यूप ऽआप्प्यते प्प्रणीतो ऽअग्निरग्निना ॥

आवाहयामि तां देवीं कुण्डलिनी नामतो मताम् ।
शोभिते कुण्डले यस्याः पूज्या कोष्ठे तृतीयके ॥

ॐ भूर्भुवः स्वः कुण्डलिन्यै नमः, कुण्डलिनीमावाहयामि स्थापयामि ॥ ३ ॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती ।। यज्ञं व्वष्टुधिया व्वसुः ।।

आवाहयामि तां देवीं बालुकां सूक्ष्मरूपिणीम् ।
सुखदां धनदां देवीं तुर्ये कोष्ठे प्रपूजयेत् ।।

ॐ भूर्भुवः स्वः बालुकायै नमः, बालुकामावाहयामि स्थापयामि ।। ४ ।।

ॐ अस्कन्नमद्य देवेभ्य ऽआज्यꣳ संभ्रिया समङ्‌घ्रिणा व्विष्ष्णो मा त्वा वक्क्रमिषं व्वसुमतीमग्ग्ने ते च्छायामुपस्त्थेषं व्विष्ष्णोः स्त्थानमसीत ऽइन्द्रो व्वीर्य्यमकृणोदूद्ध्वों दृध्वर ऽआस्थात् ।।

आवाहयामि तां देवीं कौवेरी नामतो मताम् ।
धनधान्यप्रदा देवी सम्पूज्या पञ्चमे दले ।।

ॐ भूर्भुवः स्वः कौबेर्यै नमः, कौबेरीमावाहयामि स्थापयामि ।। ५ ।।

ॐ ते ऽआचरन्तो समनेव योषा मातेव पुत्त्रं विभृतामुपस्त्थे । अपशत्त्रून्न्विवन्द्यताꣳसंव्विदाने ऽआक्त्नी ऽइमे व्विष्ष्फुरन्ती ऽअमित्त्रान् ।।

आवाहयामि तां देवीं यमदूतीति विश्रुताम् ।
यजमानसुखार्थाय षष्ठे कोष्ठे प्रपूजयेत् ।।

ॐ भूर्भुवः स्वः यमदूत्यै नमः, यमदूतीमावाहयामि स्थापयामि ।। ६ ।।

ॐ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम् । पिपृतान्नो भरीमभिः ।।

आवाहयामि तां देवीं शुभां वापि करालिनीम् ।
ऋत्विजां क्षेमकामाय पूजयेत्सप्तमे दले ।।

ॐ भूर्भुवः स्वः करालिन्यै नमः, करालिनीमावाहयामि स्थापयामि ॥ ७ ॥

ॐ उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा ऽअसि च नो मयि धेहि । जिन्न्वयज्ञं जिन्न्व यज्ञपतिं भगाय देवाय त्वा सवित्रे ॥

आवाहयामि तां देवीं कौशिकी नामतो मताम् ।
षष्ठिचत्वारिके स्थाने पूजयेदष्टमे दले ॥ ८ ॥

ॐ भूर्भुवः स्वः कौशिक्यै नमः, कौशिकीमावाहयामि स्थापयामि ॥ ८ ॥ [इति षष्ठाष्टकपङ्क्तिः ।]

ॐ आप्यायस्व समेतु ते व्विश्वतः सोम व्वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥

आवाहयामि तां देवीं यक्षिणीं यक्षवल्लभाम् ।
अबलाञ्च महाकायाँ पूजयेत् प्रथमे दले ॥

ॐ भूर्भुवः स्वः यक्षिण्यै नमः, यक्षिणीमावाहयामि स्थापयामि ॥ १ ॥

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽउन्नयामि । समापो ऽअद्भिरग्मत समोषधीभिरोषधीः ॥

आवाहयामि तां देवीं पञ्चाशत्स्थानसंस्थिताम् ।
भक्षिणी नाम या प्रोक्ता पूज्या कोष्ठे द्वितीयके ॥

ॐ भूर्भुवः स्वः भक्षिण्यै नमः भक्षिणीमावाहयामि स्थापयामि ॥ २ ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मा ऽमृतात् ॥ त्र्यम्बकं यजामहे सुगन्धिं पति वेदनम् । उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥

आवाहयामि तां देवीं कौमारीं कामरूपिणीम् ।
पुत्रकामसमृद्ध्यर्थं पूज्या कोष्ठे तृतीयके ॥

ॐ भूर्भुवः स्वः कौमार्य्यै नमः, कौमारीमावाहयामि स्थापयामि ॥ ३ ॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्म ऽइषाण सर्व्वलोकं म ऽइषाण ॥

आवाहयामि तां देवीं नाम्ना या मन्त्रवाहिनीम् ।
मन्त्राणि सकलार्थाय पूज्या कोष्ठे चतुर्थके ॥

ॐ भूर्भुवः स्वः मन्त्रवाहिन्यै नमः, मन्त्रवाहिनीमावाहयामि स्थापयामि ॥ ४ ॥

ॐ विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्त्थो व्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोऽसि । व्वैष्णवमसि विष्णवे त्वा ॥

आवाहयामि तां देवीं विशालां विश्वतो मुखाम् ॥
उपरागाय विश्वेषां पूजयेत्पञ्चमे दले ॥

ॐ भूर्भुवः स्वः विशालायै नमः, विशालामावाहयामि स्थापयामि ॥ ४ ॥

ॐ ब्राह्मणमद्य व्विदेयं पितृमन्तं पैतृमत्यमृषिमार्षेयꣳ सुधातु दक्षिणम् ॥ अस्मद्द्राता देवत्रा गच्छत प्प्रदातारमाविशत् ॥

आवाहयामि तां देवीं कार्मुकी नाम विश्रुताम् ।
उपरागाय विश्वेषां षष्ठे कोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः कार्मुक्यै नमः, कार्मुकीमावाहयामि-स्थापयामि ॥ ६ ॥

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजात्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं य्यदायुः ॥

आवाहयामि तां देवीं व्याघ्री नामेति विश्रुताम् ।
यजमानहितार्थाय पूजिता सप्तमे दले ॥

ॐ भूर्भुवः स्वः व्याघ्र्यै नमः, व्याघ्रीमावाहयामि स्थापयामि ॥ ७ ॥

ॐ एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म ऽएकादश च म ऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म ऽएकविꣳशतिश्च म ऽएकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म नवविꣳशतिश्च म ऽएकत्रिꣳशच्च म ऽएकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥

आवाहयामि तां देवीं महापूर्वां तु राक्षसीम् ।
रक्षोभयहरां देवीं पूजयेदष्टमे दले ॥

ॐ भूर्भुवः स्वः महाराक्षस्यै नमः, महाराक्षसीमावाहयामि स्थापयामि ॥ ८ ॥ [इति सप्तमाष्टकपंक्तिः ॥]

ॐ प्रेता जयता नर ऽइन्द्रो वः शर्म्म यच्छतु । उग्ग्रा वः सन्तु बाहवो ऽनाधृष्या यथासथ ॥

आवाहयामि तां देवीं नाम्ना या प्रेतभक्षिणी ।
सर्वरोगहरां देवीं पूजयेत् प्रथमे दले ॥

ॐ भूर्भुवः स्वः प्रेतभक्षिण्यै नमः, प्रेतभक्षिणीमावाहयामि स्थापयामि ।। १ ।।

ॐ असङ्ख्याता सहस्राणि ये रुद्द्रा ऽअधिभूम्याम् । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ।।

आवाहयामि तां देवीं धूर्जटां जटिलां सदा ।
यजमानहितार्थाय पूज्या कोष्ठे द्वितीयके ।।

ॐ भूर्भुवः स्वः धूर्जट्यै नमः धूर्जटीमावाहयामि स्थापयामि ।। २ ।।

ॐ सुपर्ण्णोऽसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रं चक्षुर्बृहद्द्रथन्तरे पक्षौ । स्तोम आत्मा छन्दाꣳस्यङ्गानि यजूꣳषि नाम । साम ते तनूर्व्वामदेव्व्यं य्यज्ञा यज्ञियं पुच्छं धिष्ष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वः पत ।।

आवाहयामि तां देवीं विकटां नामतो मताम् ।
सर्वदोषेषु विकटा पूज्या कोष्ठे तृतीयके ।।

ॐ भूर्भुवः स्वः विकटायै नमः विकटामावाहयामि स्थापयामि ।। ३ ।।

ॐ या ते रुद्द्र शिवा तनूरघोराऽपापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ।।

आवाहयामि तां देवीं षष्ठिस्थाने स्थितां शुभाम् ।
घोररूपां महाकायां तूर्यकोष्ठे प्रपूजयेत् ।।

ॐ भूर्भुवः स्वः घोररूपायै नमः घोररूपामावाहयामि स्थापयामि ।। ४ ।।

ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे ।।

आवाहयामि तां देवीं सकपालिक-पालिकाम् ।
यजमानहितार्थाय पूजयेत् पञ्चमे दले ॥

ॐ भूर्भुवः स्वः कपालिकायै नमः, कपालिकामावाहयामि स्थापयामि ॥ ५ ॥

ॐ इदं विष्णुर्विचक्क्रमे त्रेधा निदधे पदम् । स मूढमरय-पाᳫँसुरे स्वाहा ॥

आवाहयामि तां देवीं निकलां सकलां शुभाम् ।
सकलाभीष्टदां देवीं षष्ठकोष्ठे प्रपूजयेत् ॥

ॐ भूर्भुवः स्वः निकलायै नमः निकलामावाहयामि स्थापयामि ॥ ६ ॥

ॐ व्वृष्ण ऽऊर्म्मिरसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा वृष्ण ऽऊर्म्मिरसि राष्ट्रदा राष्ट्रममुष्म्मं देहि व्वृषसे नोऽसि राष्ट्रदा राष्ट्रं मे देहि स्वाहा व्वृषसे नोऽसि राष्ट्रदा राष्ट्रममुष्म्मं देहि ॥

आवाहयामि तां देवीममलां बलसंयुताम् ।
यज्ञेऽस्मिन्निमलां स्थाप्या पूज्या सा सप्तमे दले ॥

ॐ भूर्भुवः स्वः अमलायै नमः अमलामावाहयामि स्थापयामि ॥ ७ ॥

ॐ भार्यै दार्व्वाहारं प्रभाया ऽअग्न्येधं ब्रध्नस्य व्विष्टपायाभिषेक्तारं व्वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्प्रकरितारᳫं सर्व्वेभ्यो लोकेभ्य ऽउपसेक्तारमव ऽऋत्यै व्वधायोपमन्थितारं मेधाय व्वासः पल्पूलीं प्रकामाय रजयित्रीम् ॥

आवाहयामि तां देवीं सर्वदा सर्वसिद्धिदाम् ।
यजमानहितार्थाय पूज्या कोष्ठेऽष्टमे दले ॥

ॐ भूर्भुवः स्वः सिद्धिप्रदायै नमः, सिद्धिप्रदामावाहयामि स्थापयामि ॥ ८ ॥ [इति प्रथमाष्टकपंक्तिः ।]

ईशाने । ॐ जयायै नमः, जयामावाहयामि स्थापयामि ॥ पूर्वे । विजयायै नमः, विजयामावाहयामि स्थापयामि ॥ आग्नेये । अजितायै नमः, अजितामावाहयामि स्थापयामि ॥ दक्षिणे । अपराजितायै नमः, अपराजितामावाहयामि स्थापयामि ॥ नैर्ऋत्ये । क्षेमकर्त्र्यै नमः, क्षेमकर्त्रीमावाहयामि स्थापयामि ॥ पश्चिमे । लक्ष्म्यै नमः, लक्ष्मीमावाहयामि स्थापयामि ॥ वायव्ये । वैष्णव्यै नमः, वैष्णवीमावाहयामि स्थापयामि ॥ उत्तरे । पार्वत्यै नमः, पार्वतीमावाहयामि स्थापयामि ॥

ॐ मनो जूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु । व्विश्वेदेवास ऽइह मादयन्तामोꣳ३ प्प्रतिष्ठ ॥

साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सवाहनाः दिव्यादि चतुःषष्ठियोगिन्यः सुप्रतिष्ठिताः वरदाः भवन्तु ॥ ततः षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत् ॥

॥ इति योगिनीपूजनं समाप्तम् ॥

—:०:—

अथ वायव्यवेद्यां अजरादि क्षेत्रपालपूजनम् ॥

आचम्य प्राणानायम्य ॥ देशकालौ सङ्कीर्त्य गोत्रः शर्माऽहं सनवग्रहमख-सप्रासाद-सनन्दीश्वरशिवादिमूर्त्तीनां (विष्ण्वादि वा रामचन्द्रादिमूर्त्तीनां) स्थिरप्रतिष्ठाकर्मणि अजरादिपावनपर्यन्तानां क्षेत्रपालानामावाहनं पूजनं च करिष्ये ।

ॐ इमौ ते पक्षावजरौ पतत्त्रिणौ याब्भ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ॥ ताब्भ्यां पतेम सुकृतामु लोकं य्यत्र ऋषयो जग्मुः प्रथमजाः पुराणाः ॥

एह्येहि सर्वामररक्षक त्वं सः क्षेत्रपालः प्रथमो मतो यः ।
तं क्षेत्ररक्षाकरमुख्यपूज्यं समाह्वये त्वाजरनामधेयम् ॥
ॐ भूर्भुवः स्वः अजराय नमः, अजरमावाहयामि ॥ १ ॥

ॐ प्रथमावाꣳसरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि व्विश्श्वा। अपि प्प्रयं चोदना वां मिमाना होतारा ज्ज्योतिः प्प्रदिशा दिशन्ता ॥

एह्येहि सद्व्यापितसर्वलोकव्याप्य स्वयं रक्षति जीवलोकम् ।
सद्व्यापकाख्याय महाभुजाय क्षेत्राधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः व्यापकाय नमः, व्यापकमावाहयामि ॥ २ ॥

ॐ इन्द्रस्य व्वज्ज्रोसि मित्राव्वरुणयोस्त्वा प्प्रशास्त्रोः प्प्रशिषा युनज्मि। अव्व्यथायै त्वा स्वधायै त्वरिष्टो ऽअर्ज्जुनो मरुतां प्रसवेन जयापाम मनसा समिन्द्रियेण ॥

एह्येहि विघ्नान् हि विनाशय त्वं रक्षां कुरुष्वाखिलभूतयेभ्यः।
सदीन्द्रचौराह्वयकाय तस्मै क्षेत्राधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः इन्द्रचौराय नमः, इन्द्रचौरमावाहयामि ॥ ३ ॥

ॐ एवेदिन्द्रं व्वृषणं व्वज्रब्बाहुं व्वसिष्ठासो ऽअब्भ्यर्च्चन्त्यर्क्कैः। स न स्तुतो व्वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥

एह्येहि वृत्रासुरनाशनाय महाभयायासुरघातिने च।
सदिन्द्रमूर्त्ते स्फुरदाह्वयाय सत्क्षेत्रपालाधिपते नमस्ते ॥

ॐ भूर्भुवः स्वः इन्द्रमूर्त्तये नमः, इन्द्रमूर्तिमावाहयामि ॥ ४ ॥

ॐ उक्षा समुद्रो ऽअरुणः सुपर्ण्णः पूर्वस्य योनिं पितुराविवेश। मद्ध्ये दिवो निहितः पृश्निरश्म्मा व्विचक्क्रमे रजसस्प्पात्यन्तौ ॥

एह्येहि सर्व्वामरवन्दिताङ्घ्रे देवीकृपालोचनवर्द्धिताय ।
कठोरशब्दाखिलभीतिकर्त्रे उक्षाभिधानाय नमो नमस्ते ॥

ॐ भूर्भुव स्वः उक्षाभिधाय नमः, उक्षाभिधमावाहयामि ॥ ४ ॥

ॐ यद्देवा देवहेडनं देवासश्चकृमा व्वयम् । अग्निर्म्मातस्म्मादेनसो व्विश्श्वान्न्मुञ्चत्वᳬहसः ॥

एह्येहि कूष्माण्ड महानुभाव रक्षोगणान्नाशय नाशय त्वम् ।
क्षेत्रेशमर्य्यादिमहाभयेभ्यः त्रायस्व त्रायस्व विभो नमस्ते ॥

ॐ भूर्भुवः स्वः कूष्माण्डाय नमः, कूष्माण्डमावाहयामि ॥ ६ ॥

ॐ स न ऽइन्द्राय यज्ज्यवे व्वरुणाय मरुद्भ्यः । व्वरिवोवित्परिस्रव ॥

एह्येहि विख्यातयशोधिपुञ्ज विवेकविद्याविनयाधिवास ।
क्षेत्राधिपं विघ्नविनाशशीलं महानुभावं वरुणं प्रणौमि ॥

ॐ भूर्भुवः स्वः वरुणाय नमः, वरुणमावाहयामि ॥ ७ ॥

ॐ ब्बाहू मे बलमिन्द्रियᳬहस्तौ मे कर्म्म व्वीर्य्यम् । आत्क्मा क्षत्त्रमुरो मम ॥

एह्येहि बौद्धादिमतापहारिन् हराशु बन्दीजनबन्धनानि ।
तं बाहुकाख्यं बटुबुद्धिपुञ्जं क्षेत्राधिप त्वां भगवन्नमामि ॥

ॐ भूर्भुवः स्वः बाहुकाय नमः, बाहुकमावाहयामि ॥ ८ ॥

ॐ मुञ्चन्तु मा शपथ्यादथो व्वरुण्यादुत । अथो यमस्य पड्वीशात्सर्व्वस्म्माद्देव किल्विषात् ॥

एह्येहि वैकुण्ठपदाब्जभृङ्ग विवेकविद्याविनयाम्बुराशे ।
विमुक्तसंज्ञाय वराय तस्मै क्षेत्राधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः विमुक्ताय नमः, विमुक्तमावाहयामि ॥ ९ ॥

ॐ कुर्व्वन्नेवेह कर्म्माणि जिजीविषेंच्छतꣳ समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे ॥

एह्येहि लीलालयलिप्तकाय कस्तूरिकाचन्दनचर्चिताय ।
लक्ष्मीपते लोलविलोचनाय क्षेत्राधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः लिप्तकाय नमः, लिप्तकमावाहयामि ॥ १० ॥

ॐ सन्नः सिन्धुरवभृथायोद्यतः समुद्द्रो ऽब्भ्यवह्रियमाणः सलिलः प्प्रप्प्लुतो ययोरोजसा स्क्कभिता रजाꣳसि, व्वीर्य्येभिर्व्वीरतमा शविष्ट्ठा ॥ या पत्त्येते ऽअप्प्रतीता सहोभिर्व्विष्णू ऽअगन्न्वरुणा पूर्व्वहूतौ ॥

एह्येहि 'लीलाक' सुनामधेय लोकाधिनाथैरभिपूजितस्त्वम् ।
लूतादिविस्फोटकभीतिहन्त्रे लीलाकसंज्ञाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः लीलालोकाय नमः, लीलालोकमावाहयामि ॥

ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्व्रातेभ्यो व्व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्च वो नमः ॥

एह्येहि दीर्घास्य-कठोरनेत्रत्रयेण-विद्रावितभूतजाल ।
महोग्रदंष्ट्राविकरालधाम्ने सदेकदंष्ट्राय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः एकदंष्ट्राय नमः, एकदंष्ट्रमावाहयामि ।। १२ ।।

ॐ अर्म्मेभ्यो हस्तिपं जवायाश्वपं पुष्ट्यै गोपालं व्वीर्य्यायाविपालं तेजसे ऽजपालमिरायै कीनाशं कीलालाय सुराकारं भद्द्राय गृहपꣳ श्रेयसे वित्तधमाध्यक्ष्यायानुक्षत्तारम् ।।

एह्येहि शक्रस्य सुवाहनाय चतुर्महादन्तविराजिताय ।
ऐरावताख्याय रिपुप्रहर्त्रे सत्क्षेत्रपालाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः ऐरावताख्याय नमः, ऐरावताख्यमावाहयामि ।। १३ ।।

ॐ या ऽओषधीः पूर्व्वा ज्जाता देवेभ्यस्त्रियुगं पुरा ।। मनैनु बब्भ्रूणामहꣳ शत धामानि सप्त च ।

एह्येह्यनाचाररतान् हराशु त्वामोषधीघ्नं प्रणमसि सिद्ध्यै ।
सदौषधीवीर्यहराय तस्मै महौषधीघ्नाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः ओषधीघ्नाय नमः, ओषधीघ्नमावाहयामि ।। १४ ।।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मा ऽमृतात् । त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम् । उर्व्वारुकमिव बन्धनादितो मुक्षीय मा मुतः ।।

एह्येहि विद्याधरबुद्धिदातः सद्वाणबाणासनहस्तयुग्मः ।
करालदोर्दण्डविदाधतारिं तं बन्धनाख्यं प्रणतोऽहमस्मि ।।
ॐ भूर्भुवः स्वः बन्धनाय नमः, बन्धनमावाहयामि ।।१५।।

ॐ देव सवितः प्प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय । दिव्व्यो गन्धर्वः केतपूः केतं नः पुनातु व्वाचस्पतिर्व्वाचं नः स्वदतु ।।

एह्येहि दीर्घास्य-कठोरनेत्र-दोर्दण्ड-संत्रासित-दैत्यवृन्द ।
मे दुःखदारिद्र्यविनाशनाय आ-दिव्यकायाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः दिव्यकायाय नमः, दिव्यकायमावाहयामि ।। १६ ।।

ॐ सीसेन तन्त्रं मनसा मनीषिण ऽऊर्णासूत्रेण कवयो व्वयन्ति । अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं व्वरुणो भिषज्ज्यन् ।।

एह्येहि कस्तूरिविलिप्तकाय दोर्दण्डविद्रावितकोटिदैत्य ।
काश्मीरशत्कम्बलशोभिताय शत्कम्बलाख्याय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः कम्बलाय नमः, कम्बलमावाहयामि ।।१७।।

ॐ आशुः शिशानो व्वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिष ऽएकवीरः शतꣳ सेना ऽअजयत्साकमिन्द्रः ।।

एह्येहि शूराधिपगीतकीर्ते संक्षोभय त्वं विघ्नान् हि शीघ्रम् ।
क्षुद्रारि-पुञ्ज-क्षयकाय तस्मै संक्षोभणाख्याय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः क्षोभणाय नमः, क्षोभणमावाहयामि ।।१८।।

ॐ इमꣳ साहस्रꣳ शतधारमुत्सं व्यच्च्यमानꣳ सरिरस्य मध्ये । घृतं दुहानामदितिं जनायाग्ग्ने मा हिꣳसीः परमे व्योमन् । गवयमारण्यमनु ते दिशामि तेन चिन्न्वानस्तन्न्वो निषीद । गवयं ते शुगृच्छतु यं द्विष्ष्मस्तं ते शुगृच्छतु ।।

स्वरावविद्रावितसर्वभूत कान्तारनानापशुपालकाय ।
गोतुल्यरूपाय गरिष्ठधाम्ने क्षेत्राधिनाथाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः गवयवाय नमः, गवयवमावाहयामि ।।१९।।

ॐ कुम्भो व्वनिष्ठुर्ज्जनिता शचीभिर्य्यस्मिन्नग्ग्रे योन्न्यां गर्भो ऽअन्तः । प्लाशिर्व्व्यक्तः शतधार ऽउत्सो दुहे न कुम्भी स्वधां पितृभ्यः ।।

घोरारवाघर्घरितस्वराय घोरास्यदंष्ट्राय करालधाम्ने ।
क्षेत्राधिनाथाय घण्टाभिधाय महानुभावाय नमो नमस्ते ।।

ॐ भूर्भुवः घण्टाभिधाय नमः, घण्टाभिधमावाहयामि ।।२०।।

ॐ आक्रन्दय बलमोजो न ऽआधानिष्ट्ट निहि दुरिता बाधमानः । अपप्प्रोथ दुन्दुभे दुच्छुना ऽइत ऽइन्द्रस्य मुष्ट्टिरसि व्वीडयस्व ।।

एह्येहि पाथोनिधिमन्दिराय विशालनेत्राय वरिष्ठधाम्ने ।
नागाधिनाथाय विरोधहन्त्रे व्यालाभिधानाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः व्यालाय नमः, व्यालमावाहयामि ।। २१ ।।

ॐ इन्द्रायाहि तूतुजान ऽउप ब्ब्रह्माणि हरिवः । सुते दधिष्ष्वनश्च नः ।।

एह्येहि वीराधिपवन्दितांघ्र्ये सूक्ष्मातिसूक्ष्मस्वकरूपधर्त्रे ।
अरिष्टहर्त्रे परमाणुनाम्ने ह्यणुस्वरूपाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः अणुस्वरूपाय नमः, अणुस्वरूपमावाहयामि ।। २२ ।।

ॐ चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि । रयिं पिशङ्गं बहुलं पुरुस्पृहठं हरिरेति कनिक्रदत् ।।

प्रचण्डभुजदण्डाय ह्यतिक्रान्तेन्दुकान्तये ।
चन्द्रवारुणसंज्ञाय क्षेत्राधिपतये नमः ।।

ॐ भूर्भुवः स्वः चन्द्रवारुणाय नमः, चन्द्रवारुणमावाहयामि ।। २३ ।।

ॐ प्रतिश्रुत्काया ऽअर्तनं घोषाय भषमन्ताय बदुवादिनमनन्ताय मूकठं शब्दायाडम्बराघातं महसे व्वीणावादं क्रोशाय तूणब्रध्ध्ममवरस्प्पराय शंखध्ध्मं व्वनाय व्वनपमन्न्यतो ऽरण्याय दावपम् ।।

फेत्कारविद्राबितसर्वभूतं पापघ्नकायं हनुउग्रदेहम् ।
देवं फटाटोप-सुनामधेयं क्षेत्राधिनाथं शिरसा नमामि ।।

ॐ भूर्भुवः स्वः फटाटोपाय नमः, फटाटोपमावाहयामि ।।२४।।

ॐ उग्ग्रँ ल्लोहितेन मित्त्रठँ सौव्रत्येन रुद्द्रं दौर्व्वंत्येनेन्द्रं प्प्रक्रीडेन मरुतो बलेन साद्ध्यान्प्प्रमुदा । भवस्य कण्ठ्यठँ रुद्द्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्व्वंस्य व्वनिष्ठुः पशुपतेः पुरीतत् ।।

स्फुरज्जटाजूटविराजिताय जाड्यान्धकाराय शरीरधाम्ने ।
जगज्जनानन्दकराय तस्मै जटालसंज्ञाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः जटालाय नमः, जटालमावाहयामि ।।२५।।

ॐ पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत् । अग्ग्ने क्रत्वा क्रतूँ १ रनु ।।

कृपाकटाक्षयुक्ताय कर्णकुण्डलशोभिने ।
कुठारपाणये क्षेत्रस्वामिने क्रतवे नमः ।।

ॐ भूर्भुवः स्वः क्रतवे नमः, क्रतुमावाहयामि ।। २६ ।।

ॐ आजिघ्र कलशं मह्या त्वा व्विशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ।।

घण्टारवध्वस्तदिगन्तभीतिघोरास्यसंदर्घरितस्वरं च ।
घण्टेश्वरं पापविनाशकत्वं क्षेत्राधिनाथं भगवन्तमीडे ।।

ॐ भूर्भुवः स्वः घण्टेश्वराय नमः, घण्टेश्वरमावाहयामि ।।२७।।

ॐ व्वायो शुक्रो ऽअयामि ते मद्ध्वो ऽअग्ग्रं दिविष्ट्टिषु । आयाहि सोमपीतये स्प्पार्हो देव नियुक्त्वता ।।

एह्येहि वीरेन्द्र सुवन्दितांघ्रे विख्यातनाम्ने विततोग्रधाम्ने ।
वामप्रियायाथ विनोदकर्त्रे विटङ्कसंज्ञाय नमो नमस्ते ।।

ॐ भूर्भुवः स्त्रः विटङ्काय नमः, विटङ्कमावाहयामि ।।२८।।

ॐ दैव्व्या होतारा ऽऊर्द्ध्वमध्वरं नोऽग्रेर्ज्जिह्वामभि गृणीतम् । कृणुतं नः स्विष्टिम् ।।

एह्येहि नानामणिसंयुताय मारीगणाक्षाय मनोहराय ।
मुनीन्द्रवन्द्याय च मोहहर्त्रे नमोऽस्तु तस्मै मणिमन्दिराय ।।

ॐ भूर्भुवः स्वः मणिमतये नमः, मणिमतिमावाहयामि ।।२९।।

ॐ त्रीणि त ऽआहुर्द्दिवि बन्धनानि त्रीण्यप्प्सु त्रीण्यन्तः समुद्द्रे । उतेव मे व्वरुणश्छन्न्त्स्यर्व्वन्न्यात्त्रा त ऽआहुः परमं जनित्त्रम् ।।

एह्येहि गौरीप्रियकारकाय गणेश विघ्नौघविनाशकारिन् ।
गानप्रियायाथ गुहागृहाय गणौघबन्धाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः गणबन्धाय नमः, गणबन्धमावाहयामि ।।३०।।

ॐ प्रतिश्रुत्काया ऽअर्त्तनं घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायादुम्बराघातं महसे व्वीणावादं क्रोशाय तूणवध्ध्ममवरस्पराय शङ्खध्ध्मं व्वनाय व्वनपमन्न्यतो ऽरण्याय दावपम् ।।

प्रचण्डकोदण्डलसत्कराय करालरूपाय कुमारकाय ।
कादम्बरीपानरताय तस्मै सत्डामराख्याय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः डामराय नमः, डामरमावाहयामि ।।३१।।

ॐ शुद्धबालः सर्व्वशुद्धबालो मणिबालस्त ऽआश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्द्राय पशुपतये कर्ण्णा यामा अवलिप्ता रौद्द्रा नभोरूपाः पार्ज्जन्याः ।।

एह्येहि ढङ्कारचकप्रियाय भयापहाराय निवाशिने च ।
कुमारमित्राय विराजिताय सुढुण्ढिकर्णाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः ढुण्ढिकर्णाय नमः, ढुण्ढिकर्णमावाहयामि ॥ ३२ ॥

ॐ व्वनस्प्पते व्वीड्वङ्गो हि भूयाऽ अस्म्मत्सखा प्प्रतरणः सुवीरः। गोभिः सन्नद्धो ऽअसि व्वीडयस्वास्थाता ते जयतु जेत्वानि ॥

स्वस्थानसंस्थाय सुवेषकाय सुरारिहन्त्रे च गरिष्ठधाम्ने ।
नेत्रार्चिषा दीपितवासधाम्ने नमो नमस्ते स्थविराभिधाय ॥

ॐ भूर्भुवः स्वः स्थविराय नमः, स्थविरमावाहयामि ॥ ३३ ॥

ॐ सुपर्णं व्वस्ते मृगो ऽअस्यादन्तो गोभिः सन्नद्धा पतति प्प्रसूता। यत्रा नरः स च व्विच द्रवन्ति तत्रास्म्मब्भ्यमिषवः शर्म्म यꣳसन् ॥

विशालदंष्ट्राविकरालरूपं दन्तप्रभानुन्नमतान्धकारम् ।
दारिद्र्य-कान्तार-सुधूमकेतो नमोऽस्तु ते 'दन्तुर'-नामधेयम् ॥

ॐ भूर्भुवः स्वः दन्तुराय नमः, दन्तुरमावाहयामि ॥ ३४ ॥

ॐ अग्ग्ने ऽअच्छा व्वदेह नः प्प्रति नः सुमना भव। प्र नो यच्छ सहस्रजित्वꣳ हि धनदा ऽअसि स्वाहा ॥

एह्येहि धर्मात्मजतुल्यरूप धराधिनाथस्तुतविक्रमप्रभो ।
धनप्रदायाथ धुरन्धराय धनेशसंज्ञाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः धनदाय नमः, धनदमावाहयामि ॥ ३५ ॥

ॐ भद्रं कर्णेभिः श्शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳ शस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

एह्येहि नानाविधविक्रमस्त्वं सुरेन्द्रनागाधिपगीतकीर्ते ।
नारायणाख्यान-रताय तस्मै सन्नागकर्णाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः नागकर्णाय नमः, नागकर्णमावाहयामि ॥ ३६ ॥

ॐ बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म व्वीर्य्यम् । आत्मा क्षत्रमुरो मम ॥

एह्येहि मारीगणनाशनाय मुनिप्रवन्द्याय मनोहराय ।
दुःखप्रहर्त्रे च खलौघहर्त्रे महाभुजायाथ नमो नमस्ते ॥

ॐ भूर्भुवः स्वः मारीगणाय नमः, मारीगणमावाहयामि ॥ ३७ ॥

ॐ अपां फेनेन नमुचेः शिर ऽइन्द्रो दवर्त्तयः । व्विश्श्वा यदजयः स्पृधः ॥

एह्येहि फेत्कार महानुभाव दारिद्र्यदुःखौघविनाशकारिन् ।
येन प्रभायप्रभवे सुराणां फेत्कारसंज्ञाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः फेत्काराय नमः, फेत्कारमावाहयामि ॥३८॥

ॐ इदꣳ हविः प्रजननं मे ऽअस्तु दशव्वीरꣳ सर्व्वगणꣳ स्वस्तये । आत्मसनि प्प्रजासनि पशुसनि लोकसन्त्यभयसनि ॥ अग्निः प्प्रजां बहुलां मे करोत्त्वन्नं पयो रेतो ऽअस्म्मासु धत्त ॥

एह्येहि चातुर्थ्यसमुद्रमूर्त्ते ! चञ्चत्करास्फालनशोभिताङ्ग ।
सुतप्तकार्त्तस्वरभास्वराङ्ग तं चीकराख्यं भगवन्तमीडे ॥

ॐ भूर्भुवः स्वः चीकराय नमः, चीकरमावाहयामि ॥ ३९ ॥

ॐ या व्याघ्रं व्विषूचिकोभौ व्वृकं च रक्षति । श्येनं पतत्त्रिणꣳ सिꣳहꣳ सेमं पात्वꣳहसः ॥

सिंहाकृति तिग्मकरालदंष्ट्रं नखायुधं भीतिकरं गजानाम् ।
नागेन्द्रनीराजितपादपद्मं क्षेत्राधिपं सिंहवरं नमामि ॥

ॐ सिंहाकृतये नमः, सिंहाकृतिमावाहयामि ॥ ४० ॥

ॐ मृगो न भीमः कुचरो गिरिष्ठाः परावत ऽआजगन्था परस्याः । सृकꣳ सꣳशाय पविमिन्द्रतिग्मं व्वि शत्रून् ताड्ढि व्विमृधो तुदस्व ॥

एह्येहि मारीगणनाशनाय महेशपादार्चनतत्पराय ।
मदप्रमत्तौघमदप्रहर्त्रे मृगाधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः मृगाय नमः, मृगमावाहयामि ॥ ४१ ॥

ॐ इन्दुर्दक्षः श्येन ऽऋतावा हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधत्स्थे द्ध्रुव ऽआनिषत्तो ऽनमस्ते ऽअस्तु मा मा हिꣳसीः ॥

एह्येहि पाथोधिविलासकर्त्रे रुद्राक्षमालाविलसद्गलाय ।
यक्षप्रभामण्डितभूतलाय यक्षाधिनाथाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः यक्ष्मप्रियाय नमः, यक्ष्मप्रियमावाहयामि ॥ ४२ ॥

ॐ जीमूतस्येव भवति प्प्रतीकं य्यद्दर्म्मी याति समदामुपस्थे । अनाविद्धया तन्न्वा जय त्वꣳ स त्वा व्वर्म्मणो महिमा पिपर्त्तु ॥

एह्येहि कारुण्य-सुधा-समुद्र स्वकीय-भासा-हत-चन्द्रकान्ते ।
मेघाद्यकं वाहननामधेयं क्षेत्राधिनाथप्रवरं नमामि ॥

ॐ भूर्भुवः स्वः मेघवाहनाय नमः, मेघवाहनमावाहयामि ॥ ४३ ॥

ॐ तीव्रान्घोषान्कृण्वते व्वृषपाणयो ऽश्वा रथेभिः सह व्वाजयन्तः । अवक्क्रामन्तः प्प्रपदैरमित्त्रान्न्क्षिणन्ति शत्रूँ१ रनपव्ययन्तः ॥

एह्येहि तीक्ष्णोष्ट्र महानुभाव जया-प्रसूत-प्रतिमोग्रतेजः ।
नानाविभूषारुचिराय तस्मै तीक्ष्णोष्ट्रसंज्ञाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः तीक्ष्णोष्ट्राय नमः, तीक्ष्णोष्ट्रमावाहयामि ॥ ४४ ॥

ॐ व्वायुष्ट्वा पचतैरवत्वसितग्ग्रीवश्श्छागै न्न्यंग्ग्रोधश्चमसैः शल्मलिर्व्वृद्धया । एष रत्यरात्थ्यो व्वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्मा ऽक्कृष्णश्च नो ऽवतु नमोऽऽग्नये ॥

एह्येहि रातिव्रजनाशनाय खड्गोग्रधाराक्षतदुर्जनाय ।
अग्निस्वरूपाय गुणैकधाम्नेऽनलाभिधानाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः अनलाय नमः, अनलमावाहयामि ॥४५॥

ॐ आदित्यास्त्वा पृष्ठे सादयाम्म्यन्तरिक्षस्य धर्त्री व्विष्टम्भनीं दिशामधिपत्नीं भुवनानाम् । ऊर्म्मिमद्द्र॑प्सो ऽअपामसि व्विश्वकर्म्मातऽऋषिरश्विनाद्ध्वर्य्यू सादयतामिह त्वा ॥

एह्येहि कोटीन्दुसमप्रभाय शुद्धाम्बराकल्पविराजिताय ।
शरीरसामर्थ्ययुताय तस्मै तच्छुक्लतुण्डाय नमो नमस्ते ॥

ॐ भूर्भुवः स्वः शुक्लतुण्डाय नमः, शुक्लतुण्डमावाहयामि ॥ ४६ ॥

ॐ द्यौस्ते पृथिव्व्यन्तरिक्षं व्वायुश्छिद्रं पृणातु ते । सूर्य्यस्ते नक्षत्त्रैः सह लोकं कृणोतु साधुया ॥

एह्येहीह सुधालाप संसारभयहारक ।
सुखप्रदाय भक्तानां क्षेत्रपालाय ते नमः ॥

ॐ भूर्भुवः स्वः अन्तरिक्षाय नमः, अन्तरिक्षमावाहयामि ॥४७॥

ॐ सम्बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्व्वसुभिः सम्मरुद्भिः । समिन्द्रो व्विश्वदेवेभिरङ्क्तां दिव्व्य नभो गच्छतु यत्स्वाहा ॥

एह्येहि बन्दीगणबन्धमोचनं बुद्धिप्रदं बाहुबलप्रकाशम् ।
बोधप्रदं बर्बरकाभिधानं क्षेत्राधिनाथं शिरसा नमामि ॥

ॐ भूर्भुवः स्वः बर्बरकाय नमः, बर्बरकमावाहयामि ॥४८॥

ॐ पवमानः सो अद्य नः पवित्रेण व्विचर्षणिः । यः पोता स पुनातु मा ॥

एह्येहि राकापतितुल्यवक्त्र स्वरावसम्पूरितदिक्तटाय ।
पूतात्मने सत्पवनाभिधाय क्षेत्राधिनाथाय नमो नमस्ते ।।

ॐ भूर्भुवः स्वः पावनाय नमः पावनमावाहयामि ।।४९।।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञठँ समिमन्दधातु । विश्वेदेवा स इह मादयन्तामों३ प्रतिष्ठ ।। इति अजरादिपावनान्ताः क्षेत्रपालाः सुप्रतिष्ठिताः वरदाः भवन्तु ।। ॐ अजरादिपावनान्तक्षेत्रपालेभ्यो नमः इति पूजयेत् ।। नवकोष्ठानि कृत्वा मध्ये कोष्ठे पावनं पूजयेत् ।। दिक्षु विदिक्षु अष्टसु कोष्ठेषु पञ्चकोणं कृत्वा मध्ये वृत्तं पूर्वादिक्रमेण अजरादिस्थापनं मध्ये पावनमिति क्रमः ।।

।। इति क्षेत्रपालपूजनं समाप्तम् ।।

—:०:—

श्रीयन्त्रपूजनम् ।



ॐ जटाजूटसमायुक्तामर्द्धेन्दुकृतलक्षणाम् ।
लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननाम् ।। १ ।।
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसंपन्नां सर्वाभरणभूषिताम् ।। २ ।।
सुचारुवदनां तद्वत्पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ।। ३ ।।

त्रिशूलं दक्षिणो दद्यात् खड्ग चक्रं क्रमादधः ।
तीक्ष्णबाणं तथा शक्तिर्वामतोपि निबोधत ॥ ४ ॥

खेटकं पूर्णचापं च पाशमंकुशमूद्र्ध्वजम् ।
घंटां वा परशुं वापि वामतः सन्निवेशयेत् ॥ ५ ॥

अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥ ६ ॥

हृदि शूलेन निर्भिन्नं निर्दयन्त्रविभूषितम् ।
रक्तरक्तीकृताङ्गञ्च रक्तविस्फारितेक्षणम् ॥ ७ ॥

वेष्टितं नागपाशेन भ्रुकुटीभीषणाननाम् ।
सपाशवामहस्तेन धृतकेशं च दुर्गया ॥ ८ ॥

वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ॥ ९ ॥

किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठो महिषोपरि ।
स्तूयमानञ्च तद्रूपं सन्निधौ समत्रेशयेत् ॥ १० ॥

उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायका ।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ॥ ११ ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत्ससततं देवीं धर्मकर्मार्थमोक्षदाम् ॥ १२ ॥

सिंहादुत्थाय कोपाद् धधड्-धड्-धडा धावमाना भवानी
शत्रूणां शस्त्रपाते ततड्-तड्-तडा त्रोटयन्ती शिरांसि ।
तेषां रक्तं पिबन्ती घुघुट्-घुट्-घुटा घोटयन्ती पिशाचान्
तृप्तास्तृप्ता हसन्ती खखल्-खल्-खला शाम्भवी वः पुनातु ॥१३॥

ध्यानम् ॥

ॐ महिषघ्नीं महादेवीं कुमारीं सिंहवाहिनीम् ।
दानवाँस्तर्जयन्तीश्च सर्वकामदुघां शिवाम् ॥ १ ॥

ध्यायामि मनसा दुर्गां नाभिमध्ये व्यवस्थिताम् ।
आगच्छ वरदे ! देवि ! दैत्यदर्पनिपातिनि ॥ २ ॥

पूजां गृहाण सुमुखि ! नमस्ते शङ्करप्रिये ।
सर्वतीर्थमयं वारि सर्वदेवसमन्वितम् ॥ ३ ॥

इमं घटं समागच्छ तिष्ठ देवगणैः सह ।
दुर्गे ! देवि ! समागच्छ सान्निध्यमिह कल्पय ॥ ४ ॥

बलिपूजां गृहाण त्वमष्टाभिः शक्तिभिः सह ।
अस्मिन् घटे समागच्छ स्थितिं मत्कृपया कुरु ॥ ५ ॥

रक्षां कुरु सदा भद्रे ! विश्वेश्वरि ! नमोऽस्तु ते ।
एह्येहि दुर्गे दुरितौघनाशिनि प्रचण्डदैत्यौघविनाशकारिणि ।
उमे ! महेशार्द्धशरीरधारिणि स्थिरा भव त्वं मम यज्ञकर्मणि ॥

एहि दुर्गे ! महाभागे ! रक्षार्थं मम सर्वदा ।
आवाहयाम्यहं देवि ! सर्वकामार्थसिद्धये ॥

अथ वेदोक्तलक्ष्मीपूजनविधिः ।

अथ आवाहनम्-ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

आगच्छेह महादेवि सर्वसम्पत्प्रदायिनि ।
यावद्व्रतं समाप्येत तावत्त्वं सन्निधो भव ॥ इत्यावाहनम् ॥

आसनम्—ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

दुर्गे ! देवि ! सुरेशानि ! ज्ञानमार्गप्रदे ! शिवे ! ।
आसनं मणिभूषाढ्यं गृहाण त्वं सुरेश्वरि ! ॥ इत्यासनम् ॥

पाद्यम्—ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥

कात्यायनि ! महादुर्गे ! चामुण्डे ! शङ्करप्रिये ! ।
पाद्यं गृहाण देवेशि ! भद्रकालि नमोऽस्तु ते ।।

अर्घ्यम्—ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां
तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।
जगत्पूज्ये ! त्रिलोकेशि ! सर्वदानवभञ्जिनि ! ।
अष्टांगार्घ्यं गृहाण त्वं देवि ! विश्वार्तिहारिणि ।। इत्यर्घ्यम् ।।

मधुपर्कम्—ॐ मधुव्वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।।
दधि-मधु-घृत-समायुक्तं पात्रयुग्मसमन्वितम् ।
मधुपर्कं गृहाण त्वं शुभदा भव शोभने ! ।। इति मधुपर्कम्

आचमनम्—ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं
श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्म्मे नश्यतां त्वां
वृणोमि।।
पूरितं स्वर्णपात्रे च गांगेयं निर्मलं जलम् ।
ददाम्याचमनं तुभ्यं स्वस्ति कुरु महेश्वरि ।। इत्याचमनम् ।।

स्नानम्—ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ
बिल्वः । तस्य फलानि तपसा नुदन्तु म अन्तरा याश्च
बाह्या अलक्ष्मीः ।।
ज्ञानमूर्त्ते ! भद्रकालि ! दिव्यमूर्त्ते ! सुरेश्वरि ।
स्नानं गृहाण देवेशि ! तीर्थोदकविभूषितम् ।।
इति स्नानम् ।।

पुनराचमनीयम्—ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ।।

स्नानवस्त्रोपवीतान्तेऽपि तत्स्मृतम् ।।

स्नेहस्नानम्—ॐ अꣳशुना ते ऽअꣳशुः पृच्यतां परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः ।।

स्नेहं गृहाण स्नेहेन लोकेश्वरि महानघे ।
सर्वलोकेषु शुद्धात्मन् ददामि स्नेहमुत्तमम् ।।

दुग्धस्नानम्—ॐ पयः पृथिव्यां पय ऽओषधीषु पयो दिव्यन्तरिक्षे
पयोधाः । पयस्वतीः प्रदिशः सन्तु मह्यम् ।।

कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ।।

दधिस्नानम्—ॐ दधि क्राव्णो अकारिषं जिष्णोरश्वस्य व्वाजिनः ।
सुरभि नो मुखा करत्प्रण आयूꣳषि तारिषत् ।।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यानीतं मया देवि स्नानार्थं प्रतिगृह्यताम् ।।

घृतस्नानम्—ॐ घृतं घृनपावानः पिबत व्वसां वसापावानः
पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश
ऽआदिशो व्विदिश उदिशो दिग्भ्यः स्वाहा ।।

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् ।
घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ।।

मधुस्नानम्—ॐ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳ रजः । मधु
द्यौरस्तु नः पिता ।।

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ।
तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ।।

शर्करास्नानम्—ॐ अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम् ।

अपाꣳ रसस्योरसस्तं वो गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥

पञ्चामृतस्नानम्—ॐ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशे भवत् सरित् ॥

पयो दधि घृतं चैव मधु च शर्करान्वितम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥

गन्धस्नानम्—ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
मलयाचलसम्भूतं चन्दनाऽगरुसम्भवम् ।
चन्दनं देवि देवेशि स्नानार्थं प्रतिगृह्यताम् ॥

उद्वर्तनम्—ॐ अꣳशुना ते ऽअꣳशुः पृच्यताम्परुषा परुः ।
गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः ॥
नानासुगन्धिद्रव्यं च चन्दनं रंजनीयुतम् ।
उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥

शुद्धजलेन स्नानम्—ॐ शुद्धबालः सर्वशुद्धबालो मणिबालस्त
ऽआश्विनाः श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतये
कर्ण्णायामा ऽअवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्याः ॥

वस्त्रयुग्मम्—ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतो सुराष्ट्रेस्मिन् कीर्तिमृद्धिं ददातु मे ॥
पट्टकूलयुगं देवि ! कंचुकेन समन्वितम् ।
परिधेहि कृपां कृत्वा दुर्गे दुर्गतिनाशिनी ॥
इति युग्मवस्त्रम्, पुनः आचमनम् ॥

यज्ञोपवीतम्—ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥

स्वर्णसूत्रमयं दिव्यं ब्रह्मणा निर्मितं पुरा ।
उपवीतं मया दत्तं गृहाण परमेश्वरि ॥

चन्दनम्— गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।
श्रीखण्डागरुकस्तूरिरोचनाभिः सुसंयुतम् ।
गृहाण गन्धं देवेशि ! सर्वकामफलप्रदे ! ।।इति चन्दनम्।।

सौभाग्यसूत्रदानम्—ॐ सौभाग्यसूत्रं वरदे सुवर्णमणिसंयुतम् ।
कण्ठे बध्नामि देवेशि सौभाग्यं देहि मे सदा ॥
कण्ठसूत्रं समर्पयामि नमः ॥

अक्षतान्—ॐ अक्षन्नमी मदन्त ह्यव प्रिया ऽअधूषत । अस्तोषत
स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी ॥

अक्षतान्निर्मलान् शुद्धान् मुक्तामणिसमन्वितान् ।
गृहाणेमान् महादेवि ! देहि मे निर्मलां धियम् ॥
इत्यक्षतान् समर्पयामि नमः ॥

हरिद्राचूर्णम्—ॐ हरिद्रारंजिते देवि ! सुखसौभाग्यदायिनि ।
तस्मात्त्वं पूजयाम्यत्र सुखं शान्ति प्रयच्छ मे ॥
इति हरिद्राचूर्णं समर्पयामि नमः ॥

गुलालम्—कुङ्कुमं कान्तिदं दिव्यं कामिनोकामसम्भवम् ।
कुंकुमेनार्चिते देवि प्रसीद परमेश्वरि ॥
इति गुलालं समर्पयामि नमः ॥

सिन्दूरम्—सिन्दूरमरुणाभासं जपाकुसुमसन्निभम् ।
अर्पितं ते मया देवि प्रसीद परमेश्वरि ॥
इति सिन्दूरं समर्पयामि नमः ॥

कज्जलम्—चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारकम् ।
कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि ॥
इति नेत्रे कज्जलं समर्पयामि नमः ॥

दूर्वाङ्कुरान्—ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

दूर्वादलश्यामले त्वं महोरूपे हरिप्रिये ।
अतो दूर्वाभिर्भवतीं पूजयामि सदाशिवे ॥
इति दूर्वान् समर्पयामि नमः ॥

बिल्वपत्राणि—ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
अमृतोद्भव-श्रीवृक्षो महादेवप्रियः सदा ।
बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ॥
इति बिल्वपत्राणि समर्पयामि नमः ॥

पल्लवम्—ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥
गृहद्वारे चोग्रमपि दुष्टासुरनिर्वाहिणी ॥
पूजां करोमि चार्वङ्गि पल्लवैर्नन्दनोद्भवैः ॥
इति पल्लवानि समर्पयामि नमः ॥

फलमालाम्—ॐ महादेवीं च विद्महे विष्णुपत्नीं च धीमहि
तन्नो देवी प्रचोदयात् ॥
शरत्काले समुद्भूतां निशुम्भासुरमर्दिनीम् ।
फलमालां वरां देवि ! गृहाण सुरपूजिते ! ॥
इति फलमालां समर्पयामि नमः ॥

रत्नमालाम्——ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
दधद्रत्नानि दाशुषे ।।

मुक्ताफलयुतां मालां रत्नवैदूर्यसुप्रभाम् ।
माणिक्यसुवर्णग्रथितां गृह्यतां वरदे नमः ।।

इति रत्नमालां समर्पयामि नमः ।।

पुष्पमालाम्——ॐ आपः स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ।।
पद्मपङ्कजपुष्पादिशतपत्रैर्विचित्रताम् ।।

पुष्पमालां प्रयच्छामि गृहाण त्वं सुरेश्वरि ! ।।
इति पुष्पमालां समर्पयामि नमः ।।

पुष्पाणि——ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।।

नानापुष्पविचित्राढ्यां पुष्पमालां सुशोभनाम् ।
प्रयच्छामि च पुष्पाणि गृहाण त्वं सुरेश्वरि ! ।।

इति पुष्पाणि समर्पयामि नमः ।।

पुष्पपत्राणि——कुन्द-मन्दारपुन्नागपाटली-नागकेशरम् ।
आरग्वधं कर्णिकारं जयन्तीं नवमल्लिकाम् ।।

सौगन्धिकं सकङ्कोलं पुन्नागाऽशोक-मल्लिकाम् ।
अन्यान्यपि सुगन्धीनि पुष्पपत्राणि देवि ते ।।
इति शक्तिपुष्पाणि समर्पयामि नमः ।।

अलङ्कारम्——हार-कङ्कण-केयूर-मेखला-कुण्डलादिभिः ।
रत्नाढ्यकुण्डलोपेतं भूषणं प्रतिगृह्यताम् ।।
इत्यलङ्कारं समर्पयामि नमः ।।

परिमलद्रव्याणि——ॐ अहिरिव भोगैः पर्य्येति वाहुञ्ज्याया हेतिं

परिबाधमानः। हस्तघ्नो व्विश्वा व्वयुनानि व्विद्वान्पुमान्पुमाꣳसं परिपातु व्विश्वतः ॥

चन्दनागरुकर्पूरं कुंकुमं रोचनं तथा ।
कस्तूर्यादिसुगन्धांश्च सर्वाङ्गेषु विलेपय ॥
इति परिमलद्रव्य समर्पयामि नमः ॥

धूपम्—ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥
गुग्गुलुगन्धसंयुक्तमगुर्वादिसमायुतम् ॥
दशाङ्गं गृह्ण धूपं तु भद्रकालि नमोऽस्तु ते ॥
धूपमाघ्रापयामि नमः ॥

दीपम्—ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥

सुरक्तसूत्रसद्वर्त्ति गोघृतेन च पूरितम् ।
दीपं गृहाण देवेशि नमः त्रैलोक्यसुन्दरि ॥
इति दीपं दर्शयामि नमः ॥

नैवेद्यम्—दिव्यान्नरससंपुष्टं नानाभक्ष्यैस्तु संस्कृतम् ।
चोष्य-पेय-समायुक्तमन्नं देवि गृहाण मे ॥
इति नैवेद्यं निवेदयामि नमः ॥

आचमनम्—आचम्यतां महादेवि भक्ति मे ह्यचलां कुरु ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥
इत्याचमनं समर्पयामि नमः ॥

करोद्वर्तनम्—करोद्वर्तनकं देवि सुगन्धैः परिवासितैः ।
ईप्सितं मे वरं देहि परत्र च पराङ्गतिम् ॥
करोद्वर्तनार्थे गन्धं समर्पयामि नमः ॥

हस्तप्रक्षालनार्थे जलम्—गन्धतोयं समानीतं सुवर्णकलशे स्थितम् ।
हस्तप्रक्षालनार्थाय पानीयं ते निवेदये ।।
इति हस्तप्रक्षालनार्थे जलं समर्पयामि नमः ।।

ऋतुफलम्—ॐ याः फलिनीर्य्या अफला ऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ।।
नानाफलानि दिव्यानि ऋतुकालोद्भवानि च ।
पूगीफलैश्च सहितान्यम्ब त्वामर्चयाम्यहम् ।।
इति फलानि समर्पयामि नमः ।।

ताम्बूलपूगीफलम्—ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतिं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ।।
गृहाण देवि ताम्बूलं कर्पूरेण सुवासितम् ।
पूगीफलसमायुक्तं सचूर्णं मुखमण्डनम् ।।
इति ताम्बूलं समर्पयामि नमः ।।

दक्षिणाद्रव्यम्—ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽआसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ।।
पूजायाः सङ्ग्रहार्थं तु दक्षिणा दीयते मया ।
तां गृहाण महेशानि पूजां मे सफलां कुरु ।।
इति दक्षिणां समर्पयामि नमः ।।

ध्यानम्—दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ।। इति नत्वा ।।

ज्योतिःपूजनम्—ॐ भूर्भुवः स्वः आद्यायै सर्वसुरौजोद्भवतेजःस्वरूप-श्रीदुर्गायै नमः ।।

ॐ जातवेदसे सुनवामसोमराती यतो निदहाति वेदः । स न पर्षदति दुर्गाणि विश्वानामेव सिन्धुं दुरितात्यग्निः ।।

पाद्यादिभिः पूजनं विधाय ।।

ध्यानम्—प्रधानसाधारविकल्पसत्तां स्वभाव-भावाद्भुवनत्रयस्य ।
सा विद्यया व्यक्तमपीह माया ज्योतिः परा पातु जगत्तु नित्यम् ।।

आर्तिक्यम्—ॐ आरात्त्रि पार्थिवꣳ रजः पितुरप्प्रायि धामभिः ।
दिवः सदाꣳसि बृहती व्वितिष्ट्ठस ऽआत्वेषं व्वर्तते तमः ।।
चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वं ज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ।।

मन्त्रपुष्पाञ्जलिः—ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्न्यासन् । ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ।।

ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ।। कुबेराय वैश्रवणाय राजाधिराजाय महाराजाय नमः ।। ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमः सार्वायुषान्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्ताया ऽएकराडिति ।। तदप्येष श्लोकोभिगीतो ।। मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासदः ।। ॐ विश्वतश्च्चक्षुरुत व्विश्वतो मुखो व्विश्वतो बाहुरुत व्विश्श्वतस्प्पात् ।। सम्बाहुभ्यान्धमति सम्पतत्त्रैर्द्द्यावाभूमी जनयन्देव ऽएकः ।। मन्त्रपुष्पाञ्जलिं समर्पयामि नमः ।।

शेवन्तिका-बकुल-चम्पक-पाटलाऽब्जैः
पुन्नाग-जाति-करबीर-रसाल-पुष्पैः ।

विल्व–प्रवाल–तुलसीदल—मञ्जरीभिः
त्वां पूजयामि जगदीश्वरि मे प्रसीद ।।
पापोऽहं पापकर्म्माहं पापात्मा पापसंभवः ।
त्राहि मां सर्वदा मातः सर्वपापहरा भव ।।

प्रदक्षिणा—ॐ यः शुचि प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चंञ्च श्रीकामः सततं जपेत् ।।
ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषाꣳ सहस्रयोजनेव धन्वानि तन्मसि ।।
नमस्ते देवदेवेशि नमस्ते ईप्सितप्रदे ।
नमस्ते जगतां धात्रि ! नमस्ते शंकरप्रिये ! ।।
नमः सर्वहितार्थायै जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ।।
इति प्रदक्षिणा ।।

—:०:—

देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथा ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुशरणं क्लेशहरणम् ।। १ ।।
विधेरज्ञानेन द्रविणविरहेणालसतया
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ।
तदेतत्क्षन्तव्यं जननि ! सकलोद्धारिणि शिवे !
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।। २ ।।
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे !
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।। ३ ।।

जगन्मातर्मातस्तव चरणसेवा न रचिता
न वा दत्तं देवि द्रविणमपि भूयस्तव मया।
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥ ४ ॥
परित्यक्ता देवा विविधविधसेवाकुलतया
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नापि भविता
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥ ५ ॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदम्
जनः को जानीते जननि जपनीयं जपविधौ ॥ ६ ॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली भूतेशो भजति जगदीशैकपदवीं
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥
न मोक्षस्याकांक्षा भव-विभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडाणी रुद्राणी शिव शिव भवानीति जपतः ॥ ८ ॥
नाराधितासि विधिना विविधोपचारैः
किं रूक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किंचन मय्यनाथे
धत्से कृपामुचितमम्ब परं तवैव ॥ ९ ॥
आपत्सु मग्नः स्मरणं तवैव करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं नहि माता समुपेक्षते सुतम् ।।११।।

मत्समः पातकी नास्ति पापघ्नी त्वत्समा नहि ।
एवं ज्ञात्वा महादेवी यथायोग्यं तथा कुरु ।।
अनया पूजया श्रीमहालक्ष्मीः प्रीयतां न मम ।।

—:०:—

अथ श्रीगुरुपादुका-पूजनम्—

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ।।

रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ।
आसनञ्च मया दत्तं गृहाण परमेश्वर ।। आसनं समर्पयामि ।।
उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।। पाद्यं समर्पयामि ।।
अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह ।
करुणां कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ।।
अर्घ्यं समर्पयामि ।।
सर्वतीर्थसमायुक्तं सुगन्धि निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ।। आचमनीयं जलं समर्पयामि ।।
गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदा-जलैः ।
स्नापितोऽसि मया देव ! तथा शांतिं कुरुष्व मे ।। स्नानं समर्पयामि ।।
पयो दधि घृतं चैव मधु च शर्करायुतम् ।
पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ।।
पञ्चामृतस्नानं समर्पयामि ।।

मन्दाकिन्यास्तु यद्वारि सर्वपापहरं शुभम् ।
तदिदं कल्पितं देव स्नानार्थं प्रतिगृह्यताम् ॥
शुद्धोदकस्नानं समर्पयामि ॥
सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥
वस्त्रं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ॥
ॐ सुजातो ज्ज्योतिषा सह शर्म्म व्वरूथमासदत्स्वः ।
व्वासोऽअग्ग्ने व्विश्श्वरूपꣳ संव्ययस्व व्विभावसो ॥
उपवस्त्रं समर्पयामि ॥ आचमनीयं जलं समर्पयामि ।
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ गन्धं समर्पयामि ॥
अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥
अक्षतान्समर्पयामि ॥
पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
पूजार्थं दीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम् ॥
पुष्पाणि समर्पयामि ॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥
पुष्पमालां समर्पयामि ॥
वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
धूपमाघ्रापयामि ॥
आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥
दीपं दर्शयामि । हस्तप्रक्षालनम् ॥

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् ।
उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
नैवेद्यं निवेदयामि ॥

अतितृप्तिकरं तोयं सुगन्धि च पिबेच्छया ।
त्वयि तृप्ते जगत्तृप्तं नित्यतृप्ते महात्मनि ॥
मध्ये आचमनीयं जलं समर्पयामि ॥

नारिकेलफलं जम्बूफलं नारङ्गमुत्तमम् ।
कूष्माण्डं पुरतो भक्त्या कल्पितं प्रतिगृह्यताम् ॥
ऋतुफलं समर्पयामि ॥

गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां गुरुश्रेष्ठ शुद्धमाचमनीयकम् ॥
आचमनीयं जलं समर्पयामि ॥

पूगोफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलपत्रं पूगीफलं समर्पयामि ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्ति प्रयच्छ मे ॥
दक्षिणाद्रव्यं समर्पयामि ॥

चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥
आर्तिक्यं समर्पयामि ॥

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च ।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वर ॥
पुष्पांजलिं समर्पयामि ॥

प्रार्थना

निषक्तमणिपादुकं नियमिताघकोलाहलं
स्फुरत्किसलयारुणं नखसमुन्मिषच्चन्द्रिकम् ।
परामृत-सरोवरोदितसरोजरोचिष्णु तद्
भजामि शिरसि स्थितं गुरुपदारविन्दद्वयम् ।।

।। अथ गुरुमण्डलार्चनपद्धतिः ।।

हरिः ॐ व्यासपूजां प्रवक्ष्यामि सम्यक्संसिद्धिसिद्धये ।
कृत्वानुष्ठानमाषाढ्यां पूजांगे सन्निधापयेत् ।। १ ।।
प्राणायामत्रयं कृत्वा षडंगं न्यासपूर्वकम् ।
व्यासपूजां करिष्यामि इत्युक्त्वा सलिलं स्पृशेत् ।। २ ।।

तत्रायं प्रयोगः । नित्यक्रियानन्तरं क्षौरादिकं कृत्वा मठादिस्थलमागत्य पादप्रक्षालनं कृत्वा आचमनानन्तरं पूजास्थाने आसने उपविश्य प्राणायामत्रयं कृत्वा आसनबन्धादिकं प्रणवस्य ऋष्यादिषडंगन्यासं कृत्वा देशकालादि स्मृत्वा ब्राह्मणैः सह व्यासपूजां करिष्यामीति संकल्प्य पीठादौ मध्ये अष्टदलकमलकर्णिकायां १ ॐ आं आधारशक्त्यै नमः । २ ॐ कूं कूर्माय नमः । ३ ॐ अं अनन्ताय नमः । ४ ॐ पं पृथिव्यै नमः । ५ ॐ क्षीं क्षीरसमुद्राय नमः । ६ ॐ श्वें श्वेतद्वीपाय नमः । ७ ॐ मं मणिमण्डपाय नमः । ८ ॐ कं कल्पवृक्षाय नमः। ९ ॐ रं रत्नवेदिकायै नमः । १० ॐ रं रत्नसिंहासनाय नमः । ॐ सं सर्वशक्तिकमलासनाय नमः । कृष्णस्याग्नेये ॐ गं गणेशाय नमः गणेशं आवाहयामि १ । नैर्ऋते ॐ सं सरस्वत्यै नमः सरस्वतीं आवाहयामि । २ । वायव्ये ॐ दुं दुर्गायै नमः दुर्गां आवाहयामि ३ । ईशान्ये ॐ क्षं क्षेत्रपालाय नमः क्षेत्रपालं आवाहयामि ४ । इति पीठकोणेषु । कृष्णपञ्चकस्य आग्नेयकोष्ठे ॐ ब्रह्मणे नमः ५ । ईशानकोष्ठे ॐ रुद्राय नमः ६ । पीठमध्ये ॐ कृष्णाय नमः ७ । कृष्णपूर्वे ॐ वासुदेवाय नमः ८ । तद्दक्षिणे ॐ संकर्षणाय नमः ९ ।

पश्चिमे ॐ प्रद्युम्नाय नमः १० । उत्तरे ॐ अनिरुद्धाय नमः ११ । इति कृष्णपञ्चकम् । कृष्णपञ्चकस्य दक्षिणे मध्यकोष्ठे ॐ वेदव्यासाय नमः १२ । तत्पूर्वे ॐ वैशम्पायनाय नमः १३ । तद्दक्षिणे ॐ सुमन्तवे नमः १४ । तत्पश्चिमे जैमिनये नमः १५ । तदुत्तरे पैलाय नमः १६ । इति व्यासपञ्चकम् । कृष्णपञ्चकस्योत्तरे मध्यकोष्ठे श्रीशङ्कराचार्येभ्यो नमः १७ । तत्पूर्वे विश्वरूपाचार्येभ्यो नमः १८ । तद्दक्षिणे पद्मपादाचार्येभ्यो ममः १९ । तत्पश्चिमे हस्तामलकाचार्येभ्यो नमः २० । तदुत्तरकोष्ठे त्रोटकाचार्येभ्यो नमः २१ । इति शंकरपञ्चकम् । कृष्णपञ्चकस्य पश्चिमे मध्यकोष्ठे सनकाय नमः २२ । तत्पूर्वे सनन्दनाय नमः २३ । तद्दक्षिणे सनातनाय नमः २४ । तत्पश्चिमे सनत्कुमाराय नमः २५ । तदुत्तरे कपिलाय नमः २६ । इति सनकादिपञ्चकम् । कृष्णपञ्चकस्य नैर्ऋते मध्यकोष्ठे ऋषभदेवाय नमः २७ । तत्पूर्वे दत्तात्रेयाय नमः २८ । तद्दक्षिणे शुकाय नमः २९ । तत्पश्चिमे नारदाय नमः ३० । तदुत्तरे संवर्त्ताय नमः ३१ । इति ऋषभादिपञ्चकम् । कृष्णपञ्चकस्य वायव्ये मध्यकोष्ठे श्वेतकेतवे नमः ३२ । तत्पूर्वे दुर्वाससे नमः ३३ । तद्दक्षिणे जडभरताय नमः ३४ । तत्पश्चिमे रैवताय नमः ३५ । तदुत्तरे वामदेवाय नमः ३६ । इति श्वेतकेतुपञ्चकम् । कृष्णपञ्चकस्य पूर्वे मध्यकोष्ठे द्रविडाचार्येभ्यो नमः ३७ । तत्पूर्वे गोविन्दभगवत्पूज्यपादाचार्येभ्यो नमः ३८ । तद्दक्षिणे गौडपादाचार्येभ्यो नमः ३९ । तत्पश्चिमे विवरणाचार्येभ्यो नमः ४० । तदुत्तरे समस्तब्रह्मविद्याप्रवर्त्तकाचार्येभ्यो नमः ४१ । इति द्रविडाचार्यपञ्चकम् । कृष्णपञ्चकस्याग्नेये मध्यकोष्ठे गुरुभ्यो नमः ४२ । तत्पूर्वे परमगुरुभ्यो नमः ४३ । तद्दक्षिणे परमेष्ठिगुरुभ्यो नमः ४४ । तत्पश्चिमे परात्परगुरुभ्यो नभः ४५ । तदुत्तरे समस्तब्रह्मविद्यासम्प्रदायिभ्यो नमः ४६ । इति गुर्वादिपञ्चकम् ।

कृष्णपञ्चकस्य ईशान्ये मध्यकोष्ठे आत्मने नमः ४७ । तत्पूर्वे कोष्ठे अन्तरात्मने नमः ४८ । तद्दक्षिणकोष्ठे परमात्मने नमः ४९ । तत्पश्चिमकोष्ठे सर्वात्मने नमः ५० । तदुत्तरकोष्ठे परब्रह्मणे नमः ५१ ॥ ततो दिक्षु मण्डले ॥ पूर्वे इन्द्राय नमः ५२ । आग्नेये अग्नये नमः ५३ । दक्षिणे यमाय नमः ५४ । नैर्ऋत्ये निर्ऋतये नमः ५५ । पश्चिमे वरुणाय नमः ५६ । वायव्ये वायवे नमः ५७ । उत्तरे सोमाय नमः ५८ । ईशान्ये ईशानाय नमः ५९ । ईशानपूर्वयोर्मध्ये ब्रह्मणे नमः ६० । निर्ऋति-वरुणयोर्मध्ये अनन्ताय नमः ६१ । इति देवतास्तल्लिङ्गमन्त्रैरथवा प्रणवादिनमोन्तैस्तत्तन्नाममन्त्रैरावाह्य संस्थाप्य यथामिलितोपचारैः सम्पूज्य स्तुत्वा नमेत् । पश्चाद्धूप-दीप-आरार्त्तिकं कृत्वा नैवेद्यं समर्पयेत् । पुनराचमनं दत्वा नीराजनं कुर्यात् । ताम्बूलदक्षिणां दद्यात् । तत्र सम्प्रदायविदः । पश्चाद्द्याद्दन्तकाष्ठं वस्त्रचन्दन-दोरकान् । दन्तकाष्ठमृत्तिकाकटिसूत्रकौपीनचन्दनगोपीचन्दनकर्पूरमुखवासलवङ्गहरीतकीत्यादि समर्पयेत् । अथ पुष्पाञ्जलिं दद्यात् ।

ॐ लक्ष्मीकलत्रं शतपत्रनेत्रं पूर्णेन्दुवक्त्रं पुरुहूतमित्रम् ।
कारुण्यपात्रं कमनीयगात्रं वन्दे पवित्रं वसुदेवपुत्रम् ॥ १ ॥
ॐ नमो भगवते वासुदेवाय शुद्धरूप-स्वरूपिणे ।
हिरण्यरेतसे तुभ्यं प्राधान्यवस्तुरूपिणे ॥ २ ॥
नमोस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षि-शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ ३ ॥
कामरूपं कलावन्तं कामिनीकामदं प्रभुम् ।
मन्मथं मथुरानाथं प्रद्युम्नं प्रणमाम्यहम् ॥ ४ ॥
अनिरुद्धं महोदारं कामिनं सुन्दरप्रियम् ।
नमाम्यहं प्रपन्नेशं फुल्लेन्दीवरलोचनम् ॥ ५ ॥

तद्विष्णोरिति मन्त्रेण प्रणवेन वा पुष्पाञ्जलित्रयं दद्यात् ।

इति कृष्णपञ्चकपुष्पाञ्जलिः ।

वेदव्यासं स्वात्मरूपं सत्यसिन्धुं परायणम् ।
शान्तेन्द्रियं जितक्रोधं सशिष्यं प्रणमाम्यहम् ।
अनेन मन्त्रेण प्रणवेन वा पुष्पाञ्जलित्रयं दद्यात् ।

इति व्यासपञ्चकपुष्पाञ्जलिः ।

सर्वशास्त्रार्थतत्त्वज्ञं परमानन्दवेदिनम् ।
ब्रह्मण्यं शंकराचार्यं प्रणमामि विवेकिनम् ।।
परात्परतरं शान्तं योगीन्द्रं योगिसेवितम् ।
शान्तेन्द्रियं जितक्रोधं सशिष्यं प्रणमाम्यहम् ।।
अनेन मन्त्रेण प्रणवेन वा पुष्पाञ्जलित्रयं दद्यात् ।

इति शंकराचार्यपुष्पाञ्जलिः ।

श्रीनाथादि गुरुत्रयं गणपतिं पीठत्रयं भैरवम्
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान्द्व्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकम्
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ।।
अनया पूजया श्रीगुरुमण्डलं प्रीयताम् ।।
इति व्यासपूजाविधिः ।। श्रीगुरुदेवार्पणमस्तु ।।

अथ सूर्यादिग्रहाणां स्थापनक्रमः ।।

स्कान्दे ।। ईशाने मण्डलं कृत्वा ग्रहाणां स्थापनं ततः ।
वृत्तमण्डलमादित्यमर्धचन्द्रं निशाकरम् ।।
त्रिकोणं मङ्गलं चैव बुधं च धनुषाकृतिम् ।
गुरुमष्टदलं प्रोक्तं चतुष्कोणं च भार्गवम् ।।
नराकृतिं शनिं विन्द्याद्राहुं च मकराकृतिम् ।
केतुं खड्गसमं ज्ञेयं ग्रहमण्डलके शुभे ।। १ ।।

अथ प्रकारान्तरम् ॥

वृत्तमण्डलमादित्यं चतुरस्रं निशाकरम् ।
त्रिकोणं मङ्गलं चैव बुधं वै बाणसन्निभम् ॥

गुरवे पट्टिशाकारं पञ्चकोणं भृगुं तथा ।
मन्दे च धनुषाकारं सूर्पाकारं तु राहवे ॥

केतवे च ध्वजाकारं मण्डलानि क्रमेण तु ।
शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरु–सौम्यावुदङ्मुखौ ॥

प्रत्यङ्मुखौ शनिः–सोमौ शेषा दक्षिणतो मुखाः ।
मध्ये तु भास्करं विन्द्याच्छशिनं पूर्वदक्षिणे ॥

दक्षिणे लोहितं विन्द्याद्बुधं पूर्वोत्तरेण तु ।
उत्तरेण गुरुं विन्द्यात्पूर्वेणैव तु भार्गवम् ॥

पश्चिमे तु शनिं विन्द्याद्राहुं दक्षिणपश्चिमे ।
पश्चिमोत्तरतः केतुं इत्येषा ग्रहसंस्थितिः ॥

आदित्याभिमुखाः सर्वे साऽधिप्रत्यधिदेवताः ।
अधिदेवता दक्षिणे च वामे प्रत्यधिदेवताः ॥

अरुणौ सूर्य-भौमौ च श्वेतौ शुक्र-निशाकरौ ।
हरितवर्णो बुधश्चैव पीतवर्णो गुरुस्तथा ॥
कृष्णवर्णाः शनिः-राहु-केतवस्तु तथैव च ॥

ततः पूर्वनिर्मितहस्तमात्रं चतुरस्रं ग्रहवेद्यां श्वेतवस्त्रं प्रसार्य नवग्रहमण्डलं विलिख्य मध्यादिकोष्ठेषु उक्तदिक्षु विदिक्षु सूर्यादिग्रहाणां स्थापनं पूजनं च कुर्यात् ॥

॥ अथ सूर्याद्यावाहनम् ॥

जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् ।
तमोऽरिं सर्वपापघ्नं सूर्यमावाहयाम्यहम् ॥

ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण

भो सूर्य ! इहागच्छ इह तिष्ठ सूर्याय नमः । सूर्यमावहयामि स्थापयामि ॥ १ ॥

दधिशङ्खतुषाराभं क्षीरोदार्णवसम्भवम् ।
ज्योत्स्नापतिं निशानाथं सोममावाहयाम्यहम् ॥

ॐ इमन्देवा ऽअसपत्नꣳ सुवद्द्ध्वं महते क्षत्त्राय महते ज्ज्यैष्ठ्याय महते जानराज्ज्यायेन्द्द्रस्येन्द्रियाय । इमममुष्यपुत्त्रममुष्यै पुत्त्रमस्यै व्विश ऽएष वोमीराजा सोमो ऽस्माकं ब्ब्राह्मणानाꣳ राजा ॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयसगोत्र शुक्लवर्ण भो सोम इहागच्छ इह तिष्ठ सोमाय नमः । सोममावाहयामि स्थापयामि ॥ २ ॥

धरणीगर्भसंभूतं विद्युत्तेजस्समप्रभम् ।
कुमारं शक्तिहस्तं च भौममावाहयाम्यहम् ॥

ॐ अग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्या ऽअयम् । अपाꣳ रेताꣳसि जिन्वति ॥

ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इह तिष्ठ भौमाय नमः । भौममावाहयामि स्थापयामि ॥ ३ ॥

प्रियङ्गुकलिकाभासं रूपेणाऽप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं बुधमावाहयाम्यहम् ॥

ॐ उद्बुध्यस्वाग्ग्ने प्प्रतिजागृहि त्वमिष्ट्टापूर्तेसꣳ सृजेथामयञ्च । अस्मिन्त्सधस्थे ऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवा यजमानश्श्च सीदत ॥

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र हरितवर्ण भो बुध इहागच्छेह तिष्ठ बुधाय नमः । बुधमावाहयामि स्थापयामि ॥४॥

देवानां च मुनीनां च गुरुं काञ्चनसन्निभम् ।
वन्द्यभूतं त्रिलोकानां गुरुमावाहयाम्यहम् ॥

ॐ बृहस्पते ऽअतियदर्यो ऽअर्हाद्युमद्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छवस ऽऋतप्प्रजात तदस्म्मासु द्रविणं धेहि चित्त्रम् ॥

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरससगोत्र पीतवर्ण भो बृहस्पते ! इहागच्छेह तिष्ठ । बृहस्पतये नमः बृहस्पतिमावाहयामि ॥ ५ ॥

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं शुक्रमावाहयाम्यहम् ॥

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्त्रं पयः सोमं प्रजापतिः । ऋतेन सत्त्यमिन्द्रियं व्विपानꣳ शुक्क्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवसगोत्र शुक्लवर्ण भो शुक्र ! इहागच्छेह तिष्ठ । शुक्राय नमः शुक्रमावाहयामि ॥६॥

नीलाम्बुजसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसम्भूतं शनिमावाहयाम्यहम् ॥

ॐ शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये । शं य्योरभिस्रवन्तु नः ॥

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपसगोत्र कृष्णवर्ण भो शनैश्चर ! इहागच्छेह तिष्ठ । शनैश्चराय नमः शनैश्चरंमावाहयामि ॥ ७ ॥

अर्द्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् ।
सिंहिकागर्भसम्भूतं राहुमावाहयाम्यहम् ॥

ॐ कया नश्श्चित्र ऽआभुवदूती सदावृधः सखा । कया शचिष्ठया व्वृता ।

ॐ भूर्भुवः स्वः राठिनापुरोद्भव पैठिनसगोत्र कृष्णवर्ण भो राहो ! इहागच्छेह तिष्ठ । राहवे नमः राहुमावाहयामि ॥८॥

पालाशधूम्रसङ्काशं तारकाग्रहमस्तकम् ।
रोद्रं रौद्रात्मकं घोरं केतुमावाहयाम्यहम् ॥

ॐ केतुं कृण्वन्नकेतवे पेशोमर्य्या ऽअपेशसे । समुषद्भिरजायथाः ॥

ॐ भूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिसगोत्र कृष्णवर्ण भो केतो ! इहागच्छेह तिष्ठ । केतवे नमः केतुमावाहयामि ॥९॥

ततोऽधिदेवतास्थापनं[1] ग्रहदक्षिणपार्श्वे—

पञ्चवक्त्रं वृषारूढमुमेशञ्च त्रिलोचनम् ।
आवाहयामीश्वरं तं खट्वाङ्गवरधारिणम् ॥

ॐ त्र्यम्बकं य्यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय माऽमृतात् ॥

ॐ भूर्भुवः स्वः भो ईश्वर ! इहागच्छेह तिष्ठ । ईश्वराय नमः ईश्वरमावाहयामि ॥ १ ॥

हेमाद्रितनयां देवीं वरदां शङ्करप्रियाम् ।
लम्बोदरस्य जननीमुमामावाहयाम्यहम् ॥

श्रीश्श्च ते लक्ष्मीश्श्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्श्विनौ व्यात्तम् । इष्णन्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ।

---

(१) स्कान्दे—शिवः शिवो गुहो विष्णुर्ब्रह्मेन्द्रयमकालकाः ।
चित्रगुप्तोऽथ भान्वादि दक्षिणे चाऽधिदेवताः ॥

ॐ भूर्भुवः स्वः अयि देवि उमे ! इहागच्छेह तिष्ठ । उमायै नमः उमामावाहयामि ।। २ ।।

रुद्रतेजःसमुत्पन्नं देवसेनाग्रगं विभुम् ।
षण्मुखं कृत्तिकासूनुं स्कन्दमावाहयाम्यहम् ।।

ॐ यदक्क्रन्दः प्रथमं जायमान ऽउद्यन्त्समुद्राद्रुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्यम्महि जातन्ते ऽअर्व्वन् ।।

ॐ भूर्भुवः स्वः भो स्कन्द ! इहागच्छेह तिष्ठ । स्कन्दाय नमः स्कन्दमावाहयामि ।। ३ ।।

देवदेवं जगन्नाथं भक्तानुग्रहकारकम् ।
चतुर्भुजं रमानाथं विष्णुमावाहयाम्यहम् ।।

ॐ व्विष्ष्णो रराटमसि व्विष्ष्णोः श्न्नप्त्रेस्थो व्विष्ष्णोः स्यूरसि व्विष्ष्णोर्द्ध्रुवोऽसि । व्वैष्ष्णवमसि व्विष्ष्णवे त्वा ।।

ॐ भूर्भुवः स्वः भो विष्णो ! इहागच्छेह तिष्ठ । विष्णवे नमः विष्णुमावाहयामि ।। ४ ।।

कृष्णाजिनाऽम्बरधरं पद्मसंस्थं चतुर्मुखम् ।
वेदाधारं निरालम्बं विधिमावाहयाम्यहम् ।।

ॐ आ ब्ब्रह्मन्न्ब्राह्मणो ब्ब्रह्मवर्च्चसी जायतामा राष्ट्रे राजन्न्यः शूर ऽइषव्व्योऽतिव्व्याधी महारथो जायतां दोग्ग्ध्री धेनुर्व्वोढानड्वानाशुः सप्प्तिः पुरन्धिर्य्योषा जिष्ष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतां निकामे निकामे नः पर्ज्जन्न्यो व्वर्षतु फलवत्त्यो न ऽओषधयः पच्च्यन्न्तां योगक्षेमो नः कल्प्पताम् ।।

ॐ भूर्भुवः स्वः भो ब्रह्मन् ! इहागच्छेह तिष्ठ । ब्रह्मणे नमः ब्रह्माणमावाहयामि ।। ५ ।।

देवराजं गजारूढं शुनासीरं शतक्रतुम् ।
वज्रहस्तं महाबाहुमिन्द्रमावाहयाम्यहम् ।।

ॐ सजोषा ऽइन्द्र सगणो मरुद्भिः सोमं पिब व्वृत्रहा शूर व्विद्वान् । जहि शत्रूँ२ रप मृधो नुदस्वाथाभयं कृणुहि व्विश्श्वतो नः ।।

ॐ भूर्भुवः स्वः भो इन्द्र ! इहागच्छेह तिष्ठ । इन्द्राय नमः इन्द्रमावाहयामि ।। ६ ।।

धर्मराजं महावीर्यं दक्षिणादिक्पतिं प्रभुम् ।
रक्तेक्षणं महाबाहुं यममावाहयाम्यहम् ।।

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्मः पित्त्रे ।।

ॐ भूर्भुवः स्वः भो यम ! इहागच्छेह तिष्ठ । यमाय नमः यममावाहयामि ।। ७ ।।

अनाकारमनन्ताख्यं वर्त्तमानं दिने दिने ।
कलाकाष्ठादिरूपेण कालमावाहयाम्यहम् ।।

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्त्या ऽउन्नयामि । समापो ऽअद्भिरग्मत समोषधीभिरोषधीः ।।

ॐ भूर्भुवः स्वः भो काल ! इहागच्छेह तिष्ठ । कालाय नमः कालमावाहयामि ।। ८ ।।

धर्मराजसभासंस्थं कृताकृतविवेकिनम् ।
आवाहयेच्चित्रगुप्तं लेखनीपत्रहस्तकम् ।।

ॐ चित्रावसो स्वस्ति ते पारमशीय ।।

ॐ भूर्भुवः स्वः भो चित्रगुप्त ! इहागच्छेह तिष्ठ । चित्रगुप्ताय नमः चित्रगुप्तमावाहयामि ।। ९ ।।

ततः प्रत्यधिदेवतास्थापनं[1] ग्रहवामपार्श्वे ॥

रक्तमाल्याम्बरधरं रक्तपद्मासनस्थितम् ।
वरदाभयदं देवमग्निमावाहयाम्यहम् ॥

ॐ अग्निं दूतं पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२ ऽआसादयादिह ॥

ॐ भूर्भुवः स्वः भो अग्ने ! इहागच्छेह तिष्ठ । अग्नये नमः अग्निमावाहयामि ॥ १ ॥

आदिदेवसमुद्भूता जगच्छुद्धिकराः शुभाः ।
औषध्याप्यायनकरा अपामावाहयाम्यहम् ॥

ॐ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन । महे रणाय चक्षसे ॥

ॐ भूर्भुवः स्वः भो भोः अप ! इहागच्छत इह तिष्ठत । अद्भ्यो नमः अप आवाहयामि ॥ २ ॥

शुक्लवर्णां विशालाक्षीं कूर्मपृष्ठोपरि स्थिताम् ।
सर्वशस्याश्रयां देवीं धरामावाहयाम्यहम् ॥

ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्रथाः ॥

ॐ भूर्भुवः स्वः अयि देवि पृथिवि ! इहागच्छेह तिष्ठ पृथिव्यै नमः पृथिवीमावाहयामि ॥ ३ ॥

शङ्ख-चक्र-गदा-पद्महस्तं गरुडवाहनम् ।
किरीटकुण्डलधरं विष्णुमावाहयाम्यहम् ॥

---

[1] टि० १ स्कान्दे । अग्निरापो धरा विष्णुः शक्रेन्द्राणी पितामहाः ।
पन्नगाकः क्रमाद्वामे ग्रहप्रत्यधिदेवताः ॥

ॐ इदं व्विष्णुर्व्विचक्क्रमे त्त्रेधा निदधे पदम् । समूढमस्य पाꣳसुरे स्वाहा ॥

ॐ भूर्भुवः स्वः भो विष्णो ! इहागच्छेह तिष्ठ । विष्णवे नमः विष्णुमावाहयामि ॥ ४ ॥

ऐरावतगजारूढं सहस्राक्षं शचीपतिम् ।
वज्रहस्तं सुराधीशमिन्द्रमावाहयाम्यहम् ॥

ॐ इन्द्र ऽआसां नेता बृहस्पतिर्द्दक्षिणा यज्ञः पुर ऽएतु सोमः । देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्ग्रम् ॥

ॐ भूर्भुवः स्वः भो इन्द्र ! इहागच्छेह तिष्ठ । इन्द्राय नमः इन्द्रमावाहयामि ॥ ५ ॥

प्रसन्नवदनां देवीं देवराजस्य वल्लभाम् ।
नानाऽलङ्कारसंयुक्तां शचीमावाहयाम्यहम् ॥

ॐ अदित्यै रास्नासीन्द्राण्या ऽउष्णीषः । पूषासि घर्म्माय दीष्व ॥

ॐ भूर्भुवः स्वः अयि देवि इन्द्राणि ! इहागच्छेह तिष्ठ । इन्द्राण्यै नमः इन्द्राणीमावाहयामि ॥ ६ ॥

आवाहयाम्यहं देवदेवेशं च प्रजापतिम् ।
अनेकव्रतकर्तारं सर्वेषां च पितामहम् ॥

ॐ प्रजापते न त्वदेतान्यन्यो व्विश्श्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽअस्तु व्वयꣳ स्याम पतयो रयीणाम् ॥

ॐ भूर्भुवः स्वः भो प्रजापते ! इहागच्छेह तिष्ठ । प्रजापतये नमः प्रजापतिमावाहयामि ॥ ७ ॥

अनन्ताद्यान् महाकायान् नानामणिविराजितान् ।
आवाहयाम्यहं सर्प्पान् फणासप्तकमण्डितान् ।।

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु । ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ।।

ॐ भूर्भुवः स्वः भो भोः सर्पा ! इहागच्छत इह तिष्ठत । सर्प्पेभ्यो नमः सर्पानावाहयामि ।। ८ ।।

हंसपृष्ठसमारूढं देवतागणपूजितम् ।
आवाहयाम्यहं देवं ब्रह्माणं कमलासनम् ।।

ॐ ब्रह्म यज्ञानं प्रथमं पुररताद्विसीमतः सुरुचो व्वेन ऽआवः । स बुद्ध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ।।

ॐ भूर्भुवः स्वः भो ब्रह्मन् ! इहागच्छेह तिष्ठ । ब्रह्मणे नमः ब्रह्माणमावाहयामि ।। ९ ।।

ततो विनायकादिपञ्चलोकपालदेवता वास्तोष्पतिं क्षेत्रपालं चाऽऽवाहयेत् ।।

लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् ।
आवाहयाम्यहं देवं गणेशं सिद्धिदायकम् ।।

ॐ गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे व्वसो मम । आहमजानि गर्ब्भधमात्वमजासि गर्ब्भधम् ।।

ॐ भूर्भुवः स्वः भो गणपते ! इहागच्छेह तिष्ठ । गणपतये नमः गणपतिमावाहयामि ।। १ ।।

पत्तने नगरे ग्रामे विपिने पर्वते गृहे ।
नानाजातिकुलेशानीं दुर्गामावाहयाम्यहम् ।।

ॐ अम्बे ऽअम्बिकेम्बालिके न मा नयति कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।।

ॐ भूर्भुवः स्वः अयि देवि दुर्गे ! इहागच्छेह तिष्ठ । दुर्गायै नमः दुर्गामावाहयामि ।। २ ।।

आवाहयाम्यहं वायुं भूतानां देहधारिणम् ।
सर्वाधारं महावेगं मृगवाहनमीश्वरम् ।।

ॐ व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्त्वान्त्सोमपीतये ।।

ॐ भूर्भुवः स्वः भो वायो ! इहागच्छेह तिष्ठ । वायवे नमः वायुमावाहयामि ।। ३ ।।

अनाकारं शब्दगुणं द्यावाभूम्यन्तरस्थितम् ।
आवाहयाम्यहं देवमाकाशं सर्वगं शुभम् ।।

ॐ घृतं घृतपावानः पिबत व्वसां व्वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा । दिशः प्रदिश ऽऽआदिशो व्विदिश ऽउद्दिशो दिग्भ्यः स्वाहा ।।

ॐ भूर्भुवः स्वः भो आकाश ! इहागच्छेह तिष्ठ । आकाशाय नमः आकाशमावाहयामि ।। ४ ।।

देवतानां च भैषज्ये सुकुमारौ भिषग्वरौ ।
आवाहयाम्यहं देवावश्विनौ पुष्टिवर्द्धनौ ।।

ॐ या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ।।

ॐ भूर्भुवः स्वः भो भोः अश्विनौ ! इहागच्छतामिह तिष्ठताम् । अश्विभ्यां नमः अश्विनौ आवाहयामि ।। ५ ।।

वास्तोष्पतिं विदिक्कायं भूशय्याभिरतं प्रभुम् ।
आवाहयाम्यहं देवं सर्वकर्मफलप्रदम् ॥

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो ऽअनमीवो भवा नः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥

ॐ भूर्भुवः स्वः भो वास्तोष्पते ! इहागच्छेह तिष्ठ । वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि ॥ ६ ॥

भूत-प्रेत-पिशाचाद्यैरावृतं शूलपाणिनम् ।
आवाहये क्षेत्रपालं कर्मण्यस्मिन्सुखाय नः ॥

ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्श्वानरात्पुरऽएतारमग्नेः । एमेनमवृधन्नमृता ऽअमर्त्यं व्वैश्श्वानरङ्क्षैत्त्रजित्त्याय देवाः ॥

ॐ भूर्भुवः स्वः भो क्षेत्राधिपते ! इहागच्छेह तिष्ठ । क्षेत्राधिपतये नमः क्षेत्राधिपतिमावाहयामि ॥ ७ ॥

अथ मण्डलाद्बाह्ये दशदिक्पालानावाहयेत्—

इन्द्रं सुरपतिश्रेष्ठं वज्रहस्तं महाबलम् ।
आवाहये यज्ञसिद्ध्यै शतयज्ञाधिपं प्रभुम् ॥

ॐ त्रातारमिन्द्रमवितारमिन्द्रठँ हवे हवे सुहवठँ शूरमिन्द्रम् । ह्वयामि शक्क्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥

ॐ भूर्भुवः स्वः भो इन्द्र ! इहागच्छेह तिष्ठ । इन्द्राय नमः इन्द्रमावाहयामि ॥ १ ॥

त्रिपादं सप्तहस्तं च द्विमूर्द्धानं द्विनासिकम् ।
षण्नेत्रं च चतुःश्रोत्रमग्निमावाहयाम्यहम् ॥

ॐ त्वन्नो अग्ग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्न्वश्च्च व्वन्द्य । त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्व्रते ॥

ॐ भूर्भुवः स्वः भो अग्ने ! इहागच्छेह तिष्ठ । अग्नये नमः अग्निमावाहयामि ॥ २ ॥

महामहिषमारूढं दण्डहस्तं महाबलम् ।
यज्ञसंरक्षणार्थाय यममावाहयाम्यहम् ॥

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा घर्म्माय स्वाहा घर्म्मः पित्त्रे ॥

ॐ भूर्भुवः स्वः भो यम ! इहागच्छेह तिष्ठ । यमाय नमः यममावाहयामि ॥ ३ ॥

सर्वप्रेताधिपं देवं निर्ऋतिं नीलविग्रहम् ।
आवाहये यज्ञसिद्ध्यै नरारूढं वरप्रदम् ॥

ॐ असुन्न्वन्तमयजमानमिच्छ स्तेनस्येत्त्यामन्न्विहि तस्क्करस्य । अन्न्यमस्म्मदिच्छ सा त ऽइत्त्या नमो देवि निर्ऋते तुब्भ्यमस्तु ॥

ॐ भूर्भुवः स्वः भो निर्ऋते ! इहागच्छेह तिष्ठ । निर्ऋतये नमः निर्ऋतिमावाहयामि ॥ ४ ॥

शुद्धस्फटिकसङ्काशं जलेशं यादसां पतिम् ।
आवाहये प्रतीचीशं वरुणं सर्वकामदम् ॥

ॐ तत्त्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः । अहेडमानो व्वरुणेह बोध्युरुशꣳ स मा न ऽआयुः प्रमोषीः ॥

ॐ भूर्भुवः स्वः भो वरुण ! इहागच्छेह तिष्ठ । वरुणाय नमः वरुणमावाहयामि ॥ ५ ॥

मनोजवं महातेजं सर्वतश्चारिणं शुभम् ।
यज्ञसंरक्षणार्थाय वायुमावाहयाम्यहम् ॥

ॐ आ नो नियुद्भिः शतिनीभिरद्ध्वरठं सहस्रिणीभिरुपयाहि यज्ञम् । व्वायो ऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥

ॐ भूर्भुवः स्वः भो वायो ! इहागच्छेह तिष्ठ । वायवे नमः वायुमावाहयामि ॥ ६ ॥

आवाहयामि देवेशं धनदं यक्षपूजितम् ।
महाबलं दिव्यदेहं नरयानगतिं विभुम् ॥

ॐ व्वयठं सोम व्व्रते तव मनस्तनूषु बिभ्रतः । प्प्रजावन्तः सचेमहि ॥

ॐ भूर्भुवः स्वः भो सोम ! इहागच्छेह तिष्ठ । सोमाय नमः सोममावाहयामि ॥ ७ ॥

सर्वाधिपं महादेवं भूतानां पतिमव्ययम् ।
आवाहये तमीशानं लोकानामभयप्रदम् ॥

ॐ तमीशानञ्जगतस्तस्थुषस्प्पतिं धियञ्जिन्न्वमवसे हूमहे व्वयम् । पूषा नो यथा व्वेदसामसद्द्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

ॐ भूर्भुवः स्वः भो ईशान ! इहागच्छेह तिष्ठ । ईशानाय नमः ईशानमावाहयामि ॥ ८ ॥

पद्मयोनिं चतुर्मूर्तिं वेदगर्भं पितामहम् ।
आवाहयामि ब्रह्माणं यज्ञसंसिद्धिहेतवे ॥

ॐ अस्म्मे रुद्द्रा मेहना पर्व्वतासो व्वृत्त्रहत्ये भरहूतौ सजोषाः । यः सठंसते स्तुवते धायि पज्ज्र ऽइन्द्रज्ज्येष्ठा ऽअस्म्माँ२ ऽअवन्तु देवाः ॥

पूर्वेशानयोर्मध्ये ॐ भूर्भुवः स्वः भो ब्रह्मन् ! इहागच्छेह तिष्ठ । ब्रह्मणे नमः ब्रह्माणमावाहयामि ।। ९ ।।

अनन्तं सर्वनागानामधिपं विश्वरूपिणम् ।
जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम् ।।

ॐ स्योना प्पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म्म सप्प्रथाः ।। निर्ऋति-पश्चिमयोर्मध्ये ।। ॐ भूर्भुवः स्वः भो अनन्त ! इहागच्छेह तिष्ठ । अनन्ताय नमः अनन्तमावाहयामि ।। १० ।।

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्ट्टं य्यज्ञꣳ समिमन्दधातु । व्विश्श्वेदेवास ऽइह मादयन्तामों३ प्रतिष्ठ ।।

ॐ सूर्यादि-अनन्तान्तदेवताः सुप्रतिष्ठताः वरदाः भवन्तु ।। सूर्यादि-अनन्तान्तदेवताभ्यो नमः इति मन्त्रेण आसनाद्युपचारैः प्रत्येकमेकत्र वा काण्डानुसमयेन पदार्थानुसमयेन वा षोडशोपचारैः सम्पूज्य प्रार्थयेत् ।।

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनि-राहु-केतवः सर्वे ग्रहाः शान्तिकरा भवन्तु ।।११।।

ॐ ग्रहा ऽऊर्ज्जाहुतयो व्व्यन्तो व्विप्प्राय मतिम् । तेषां व्विशिप्प्रियाणां व्वोहमिषमूर्ज्जꣳ समग्ग्रभमुपयामगृहीतोऽसीन्द्राय त्वा जुष्ट्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्वा जुष्ट्टतमम् ।। इति प्रार्थना ।।

अनया पूजया सूर्यादि-अनन्तान्तदेवताः प्रीयन्ताम् ।।

ततो गृहस्येशानदिग्भागे कलशस्थापनविधिना रुद्रकलशं संस्थाप्य कलशे वरुणं असंख्यातरुद्रांश्चाऽऽवाह्य पूजयेत् ।। तद्यथा ।।

ॐ असङ्ख्याता सहस्राणि ये रुद्द्रा ऽअधि भूम्म्याम् । तेषाꣳ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि ।। असङ्ख्यातरुद्रेभ्यो नमः असङ्ख्यातरुद्रानावाहयामि ।।

ॐ मनो जूतिर्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्ट्टं य्यज्ञꣳ समिमन्दधातु । व्विश्श्वेदेवास ऽइह मादयन्तामों३ प्रतिष्ठ ।। इति मन्त्रेण प्रतिष्ठाप्य ।। असङ्ख्यातरुद्रेभ्यो नमः इति सम्पूज्य ।।

अथ पंचभूसंस्काराग्निस्थापन-कुशकण्डिकाकरणम् ।।

अस्मिन् गुरुमंडलार्चनाख्ये कर्मणि पंचभूसंस्कारपूर्वकमग्निस्थापनं च करिष्ये । अथ पंचभू-संस्कारः ।। कुशैः परिसमुह्य, तान्कुशानैशान्यां परित्यज्य ।।१।। गोमयोदकाभ्यामुपलिप्य ।।२।। स्रुवेणोल्लिख्य ।।३।। अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य ।।४।। जलेनाभ्युक्ष्य ।।५।।

ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुप ब्ब्रुवे । देवाँ२ ऽआसादयादिह ।। इत्यग्निं स्थापयेत् ।।

अग्नेर्दक्षिणतो ब्रह्मासनम् ।। अग्नेरुत्तरतः प्रणीतासनद्वयम् ।। ब्रह्मासने ब्रह्मोपवेशनम् ।। यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव, इति यजमानः ।। भवामीति ब्रह्मा वदेत् ।। ब्रह्मणाऽनुज्ञातः प्रणीताप्रणयनम् ।। तत्र क्रमः ।। प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य प्रथमासने निधाय ब्रह्मणो मुखमवलोक्य द्वितीयासने निदध्यात् ।। ईशानादिपूर्वाग्रैः कुशैः परिस्तरणम् ।। तद्यथा ।। ततो बर्हिषश्चतुर्थभागमादाय ।। आग्नेयादीशानान्तम्, उदगग्रैर्वा ।। ब्रह्मणोऽग्निपर्यन्तं प्रागग्रैः, नैर्ऋत्याद्वायव्यान्तम्, उदगग्रैर्वा ।। अग्नितः प्रणीतापर्यन्तं प्रागग्रैः, इतरथावृत्तिः ।। अथ पात्रासादनं पश्चादुत्तरतो वा स्यात् तद्यथा ।।

त्रीणि पवित्रे द्वे ॥ प्रोक्षणीपात्रम् ॥ आज्यस्थाली ॥ चरुस्थाली ॥ सम्मार्जनकुशाः पञ्च ॥ उपयमनकुशाः सप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यम् ॥ तण्डुलाः ॥ पूर्णपात्रम् ॥ उपकल्पनीयानि द्रव्याणि निधाय (पवित्रच्छेदनानि) द्वयोरुपरि त्रीणि निधाय ॥ द्वौ मूलेन प्रदक्षिणीकृत्य सर्वान् युगपदनामिकाङ्गुष्ठाभ्यां धृत्वा ॥ त्रिभिश्छिद्य ॥ द्वौ ग्राह्यौ त्रिस्त्याज्यः ॥ प्रोक्षणीपात्रे प्रणीतोदकमासिच्य (त्रिः पूर्णं) पवित्राभ्यामुत्पवनम् ॥ प्रोक्षण्याः सव्यहस्तकरणम् ॥ दक्षिणेनोद्दिङ्गनम् ॥ प्रणीतोदकेन प्रोक्षणीप्रोक्षणम् ॥ प्रोक्षण्युदकेन आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रोक्षणम् ॥ संमार्जनकुशानां प्रोक्षणम् ॥ उपयमनकुशानां प्रोक्षणम् ॥ समिधां प्रोक्षणम् ॥ स्रुवस्य प्रोक्षणम् ॥ आज्यस्य प्रोक्षणम् ॥ तण्डुलानां प्रोक्षणम् ॥ पूर्णपात्रस्य प्रोक्षणम् ॥ उपकल्पनीयानां पदार्थानां प्रोक्षणम् ॥ असञ्चरे प्रोक्षणीर्निधाय ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ चरुस्थाल्यां प्रणीतोदकासेकपूर्वकं तण्डुलप्रक्षेपः ॥ ब्रह्मणो दक्षिणत आज्याधिश्रयणम् ॥ चरोरधिश्रयणं स्वयमाज्यस्योत्तरतः ज्वलदुल्मुकेनोभयोः पर्यग्निकरणम् ॥ इतरथावृत्तिः ॥ उदकोपस्पर्श अर्धश्रिते चरौ अधोमुखस्य स्रुवस्य प्रतपनम् ॥ सम्मार्जनकुशैः स्रुवस्योर्ध्वमुखस्य सम्मार्जनम् ॥ अग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं सम्मृज्य ॥ प्रणीतोदकेनाभ्युक्षणम् ॥ सम्मार्जनकुशानामग्नौ प्रक्षेपः ॥ पुनः प्रतपनं दक्षिणदेशे निधानम् ॥ आज्योद्वासनम् ॥ चरुं पूर्वेणानीयाऽग्नेरुत्तरतः स्थापयेत् ॥ चरोरुद्वासनम् ॥ अग्नेरुत्तरत एवाज्यस्य प्रदक्षिणीकृत्य आज्यस्योत्तरतश्चरुं स्थापयेत् ॥ आज्योत्पवनम् ॥ आज्यावेक्षणम् ॥ अपद्रव्यनिरसनम् ॥ पुनः प्रोक्षण्युत्पवनम् ॥ वामहस्ते उपयमनकुशानादाय ॥ उत्तिष्ठन् समिधोभ्यादाय घृताक्ताः समिधस्तिस्रः अग्नौ क्षिपेत् ॥ प्रोक्षण्युदकेन सपवित्रहस्तेन ईशानादि अग्नेः प्रदक्षिणं

पर्युक्षणम् ॥ इतरथावृत्तिः ॥ पवित्रयोः प्रणीतासु निधानम् ॥ दक्षिणं जान्वाच्य ॥ ब्रह्मणा कुशैरन्वारब्धः ॥ समिद्धतमेऽग्नौ स्रुवेणाज्यहोमः ॥ अग्नेरुत्तरभागे ॥ ॐ प्रजापतये स्वाहा । इदं प्रजापतये न मम ॥ अग्नेर्दक्षिणभागे ॥ ॐ इन्द्राय स्वाहा । इदमिन्द्राय न मम ॥ समिद्धतमे ॥ ॐ अग्नये स्वाहा । इदमग्नये न मम ॥ ॐ सोमाय स्वाहा । इदं सोमाय न मम ॥

इत्याज्यभागौ हुत्वा । अनन्वारब्धः प्रधानाहुतीर्जुहुयात् । प्राणादिपञ्चमन्त्रैः समिच्चर्वाज्यानि प्रतिद्रव्यं सकृत्सकृत् । ॐ प्राणाय स्वाहा । इदं प्राणाय न मम ॥ ॐ अपानाय स्वाहा । इदमपानाय न मम ॥ ॐ व्यानाय स्वाहा । इदं व्यानाय न मम ॥ ॐ उदानाय स्वाहा । इदमुदानाय न मम ॥ ॐ समानाय स्वाहा । इदं समानाय न मम ॥

ततः पुरुषसूक्तस्य षोडशर्चैः प्रत्यृचं क्रमेण द्रव्यत्रयाणि जुहुयात् ।

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिठं सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥
स्वाहा । इदं पुरुषाय न मम ॥ १ ॥

पुरुष ऽएवेदठं सर्व्वं य्यद्भूतं य्यंच्च भाव्व्यम् ।
उतामृत त्वस्येशानो यदन्नेनातिरोहति ॥
स्वाहा । इदं पुरुषाय न मम ॥ २ ॥

एतावानस्य महिमातो ज्ज्यायाँश्च पूरुषः ।
पादोस्य व्विश्श्वा भूतानि त्त्रिपादस्यामृतं दिवि ॥
स्वाहा । इदं पुरुषाय न मम ॥ ३ ॥

त्रिपाद्दूर्ध्वं ऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो व्विष्ष्वङ् व्व्यक्क्रामत्साशनानशनेऽअभि ॥
स्वाहा । इदं पुरुषाय न मम ॥ ४ ॥

ततो व्विराडजायत व्विराजो ऽअधि पूरुषः ।
स जातो ऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः ॥
स्वाहा । इदं पुरुषाय न मम ॥ ५ ॥

तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ।
पशूँस्ताँश्चक्क्रे व्वायव्व्यानारण्या ग्राम्म्याश्च्च ये ॥
स्वाहा । इदं पुरुषाम न मम ॥ ६ ॥

तस्माद्यज्ञात्सर्व्वहुत ऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्म्माद्यजुस्तम्मादजायत ॥
स्वाहा । इदं पुरुषाय न मम ॥ ७ ॥

तस्म्मादश्श्वा ऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्म्मात्तस्म्माज्जाता अजावयः ॥
स्वाहा । इदं पुरुषाय न मम ॥ ८ ॥

तं य्यज्ञं बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ।
तेन देवा ऽअयजन्त साद्ध्या ऽऋषयश्श्च ये ॥
स्वाहा । इदं पुरुषाय न मम ॥ ९ ॥

यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्प्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा ऽउच्च्येते ॥
स्वाहा । इदं पुरुषाय न मम ॥ १० ॥

ब्ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्न्यः कृतः ।
ऊरू तदस्य यद्द्वैश्यः पद्भ्याꣳ शूद्द्रो ऽअजायत ॥
स्वाहा । इदं पुरुषाय न मम ॥ ११ ॥

चन्द्रमा मनसो जातश्श्चक्षोः सूर्य्यो ऽअजायत ।
श्श्रोत्राद्वायुश्श्च प्प्राणश्श्च मुखादग्निरजायत ॥
स्वाहा । इदं पुरुषाय न मम ॥ १२ ॥

नाभ्या ऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२ ऽअकल्पयन् ॥
स्वाहा । इदं पुरुषाय न मम ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्न्वत ।
व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्म्म ऽइध्मः शरद्धविः ॥
स्वाहा । इदं पुरुषाय न मम ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञन्तन्वाना ऽअबध्नन्पुरुषम्पशुम् ॥
स्वाहा । इदं पुरुषाय न मम ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ।
ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥
स्वाहा । इदं पुरुषाय न मम ॥१६॥

अथ विरजामन्त्रैः प्रतिमन्त्रमेतैरेव द्रव्यैः क्रमेण प्रतिद्रव्यं सकृत्सकृदेकोनविंशदाहुतीर्जुहुयात् । तद्यथा । ॐ प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं प्राणादिभ्यो न मम । ॐ वाङ्मनश्चक्षुश्श्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिः सङ्कल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं वागादिभ्यो न मम । ॐ त्वक्चममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं त्वगादिभ्यो न मम । ॐ शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घाशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं शिर आदिभ्यो न मम । ॐ उत्तिष्ठ पुरुष हरितपिंगललोहिताक्ष देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं पुरुषाय न मम । ॐ पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्तां

ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं पृथिव्यादिभ्यो न मम । ॐ शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं शब्दादिभ्यो न मम । ॐ मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं मन आदिभ्यो न मम । ॐ अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदमव्यक्तादिभ्यो न मम । ॐ आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदमात्मने न मम । ॐ अन्तरात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदमन्तरात्मने न मम । ॐ परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदं परमात्मने न मम । ॐ क्षुधे स्वाहा । इदं क्षुधे न मम । ॐ क्षुत्पिपासायै स्वाहा । इदं क्षुत्पिपासायै न मम । ॐ विविघ्न्यै स्वाहा । इदं विविघ्न्यै न मम । ॐ ऋग्विधानाय स्वाहा । इदं ऋग्विधानाय न मम । ॐ कर्षोत्काय स्वाहा । इदं कर्षोत्काय न मम । ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धि च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा । इदमग्नये न मम । ॐ अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा । इदमन्नमयादिभ्यो न मम ।

ततः सूर्यादिग्रहाणां अधिदेवता-प्रत्यधिदेवतागणपत्यादि पञ्चलोकपाल--वास्तोष्पति-क्षेत्रपालदेवतानां इन्द्रादिदशदिक्पालदेवतानां च प्रत्येकं समित्तिलचर्वाज्यद्रव्यैः अष्टोत्तरशतमष्टाविंशतिमष्टौ वा जुहुयात् ॥

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा
प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम ।
आहमजानि गर्ब्भधमा त्त्वमजासि गर्ब्भधम् स्वाहा ॥ १ ॥

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ।
ससस्त्यश्श्वकः सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ।। २ ।।

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ।।१।।

ॐ इमं देवा ऽअसपत्क्नठँ सुबद्ध्वम्महते क्षत्राय महते
ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय ।
इमममुष्य पुत्रममुष्यै पुत्रमस्यै व्विश ऽएष वोमी राजा
सोमो ऽस्माकं ब्राह्मणानाꣳ राजा स्वाहा ।। २ ।।

ॐ अग्निम्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्या ऽअयम् ।
अपाꣳ रेताꣳसि जिन्वति स्वाहा ।। ३ ।।

ॐ उद्बुध्यस्वाग्ग्ने प्रतिजागृहि त्वमिष्टापूर्ते सठँसृजेथामयञ्च ।
अस्मिन्त्सधस्थे ऽअध्युत्तरस्मिन्विश्श्वे देवा यजमानश्च सीदत
स्वाहा ।। ४ ।।

ॐ बृहस्पते ऽअतियदर्य्यो ऽअर्हाद्द्युमद्विभाति क्क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऽऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम्
स्वाहा ।। ५ ।।

ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्त्रम्पयः
सोमम्प्रजापतिः । ऋतेन सत्त्यमिन्द्रियं व्विपानठँ शुक्क्रमन्धस
ऽइन्द्रस्येन्द्रियमिदं पयोमृतम्मधु स्वाहा ।। ६ ।।

ॐ शन्नो देवीरभिष्टय ऽआपो भवन्तु पीतये ।
शं य्योरभि स्रवन्तु नः स्वाहा ।। ७ ।।
ॐ कया नश्चित्र ऽआभुवदूती सदावृधः सखा ।
कया शचिष्ठया व्वृता स्वाहा ।। ८ ।।
ॐ केतुङ्कृण्वन्न केतवे पेशो मर्य्या अपेशसे ।
समुषद्भिरजायथाः स्वाहा ।। ९ ।।

ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा ॥ १० ॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे
नक्षत्राणि रूपमश्विनौ व्यात्तम् ।
इष्णन्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण स्वाहा ॥ ११ ॥

ॐ यदक्क्रन्दः प्रथमं जायमान ऽउद्यन्त्समुद्द्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू ऽउपस्तुत्यं महि जातन्ते
ऽअर्व्वन् स्वाहा ॥१२॥

ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रेस्त्थो व्विष्णोः स्यूरसि
व्विष्णोर्द्ध्रुवोसि । व्वैष्णवमसि व्विष्णवे त्वा स्वाहा ॥१३॥

ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्यो
ऽतिव्व्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः
सप्तिः पुरन्ध्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य
व्वीरो जायतां निकामे निकामे नः पर्ज्जन्यो व्वर्षतु फलवत्यो न
ऽओषधयः पच्च्यन्तां योगक्षेमो नः कल्प्पताम् स्वाहा ॥ १४ ॥

ॐ सजोषा ऽइन्द्र सगणो मरुद्भिः सोमम्पिब व्वृत्रहा शूर विद्वान् ।
जहि शत्रूँ२ रष मृधो नुद स्वाथाभयङ्कृणुहि व्विश्वतो
नः स्वाहा ॥ १५ ॥

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा ॥ १६ ॥

ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या ऽउन्नयामि ।
समापो ऽअद्भिरग्मत समोषधीभिरोषधीः स्वाहा ॥ १७ ॥

ॐ चित्रावसो स्वस्ति ते पारमशीय स्वाहा ॥ १८ ॥

ॐ अग्निन्दूतं पुरोदधे हव्व्यवाहमुपब्ब्रुवे ।
देवाँ२ ऽआसादयादिह स्वाहा ॥ १९ ॥

ॐ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन ।
महेरणाय चक्षसे स्वाहा ॥ २० ॥

ॐ स्योना प्पृथिवी नो भवान्नृक्षरा निवेशनी ।
यच्छा नः शर्म्म सप्प्रथाः स्वाहा ॥ २१ ॥

ॐ इदं व्विष्णुर्विचक्क्रमे त्त्रेधा निदधे पदम् ।
समूढमस्य पाꣳसुरे स्वाहा ॥ २२ ॥

ॐ इन्द्र ऽआसान्नेता बृहस्पतिर्द्दक्षिणा यज्ञः पुर ऽएतु सोमः ।
देवसेनानामभिभञ्जन्तीनां जयन्तीनां मरुतो यन्त्वग्ग्रम्
स्वाहा ॥ २३ ॥

ॐ अदित्यै रास्नासीन्द्राण्या ऽउष्णीषः ।
पूषासि घर्म्माय दीष्व स्वाहा ॥ २४ ॥

ॐ प्प्रजापते न त्वदेतान्न्यन्न्यो विश्श्वा रूपाणि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो ऽअस्तु व्वयꣳ स्याम पतयो रयीणाꣳ
स्वाहा ॥ २५ ॥

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः स्वाहा ॥२६॥

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेन ऽआवः ।
सबुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः
स्वाहा ॥ २७ ॥

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे
निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम । आहमजानि
गर्ब्भधमा त्वमजासि गर्ब्भधम् स्वाहा ॥ २८ ॥

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्श्चन ।
ससस्त्यश्श्वकः सुभद्द्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥ २९ ॥

ॐ व्वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि ।
नियुत्वान्त्सोमपीतये स्वाहा ॥ ३० ॥

ॐ घृतङ् घृतपावानः पिबत व्वसां व्वसापावानः पिबतान्तरिक्षस्य
हविरसि स्वाहा । दिशः प्रदिश ऽआदिशो व्विदिश ऽउद्दिशो
दिग्भ्यः स्वाहा ॥ ३१ ॥

ॐ या वाङ्कशा मधुमत्यश्विना सूनृतावती ।
तया यज्ञम्मिमिक्षतम् ॥ ३२ ॥

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो ऽअनमीवो भवानः ।
यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे
स्वाहा ॥ ३३ ॥

ॐ नहि स्पशमविदन्नन्यमस्म्माद्वैश्वानरात्पुर ऽएतारमग्ग्नेः ।
एमेनमवृधन्नमृता ऽअमर्त्यं व्वैश्वानरङ् क्षैत्रजित्याय देवाः
स्वाहा ॥ ३४ ॥

ॐ त्वन्नो ऽअग्ग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्श्च वन्द्य ।
त्राता तोकस्य तनये गवामस्य निमेषठं रक्षमाणस्तव
व्व्रते स्वाहा ॥ ३५ ॥

ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ।
स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे स्वाहा ॥ ३६ ॥

ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्विहि तस्करस्य ।
अन्यमस्म्मदिच्छ सात ऽइत्त्या नमो देवि निर्ऋते तुभ्यमस्तु
स्वाहा ॥ ३७ ॥

ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो व्वरुणेह बोद्ध्युरुशठं स मा न ऽआयुः प्प्रमोषीः
स्वाहा ॥ ३८ ॥

ॐ आनो नियुद्भिः शतिनीभिरद्ध्वरठं सहस्त्रिणीभिरुपयाहि यज्ञम् ।
व्वायोऽअस्म्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः
स्वाहा ॥ ३९ ॥

ॐ व्वयᳬठ सोम व्व्रते तव मनस्तनूषु विब्भ्रतः ।
प्प्रजावन्तः सचेमहि स्वाहा ॥ ४० ॥

ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्न्वमवसे हूमहे व्वयम् ।
पूषा नो यथा व्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये
स्वाहा ॥ ४१ ॥

ॐ अस्म्मे रुद्द्रा मेहना पर्व्वतासो व्वृत्त्रहत्ये भरहूतौ सजोषाः ।
यः शᳬसते स्तुवते धायि पज्र ऽइन्द्र ज्येष्ठा ऽअस्म्माँ२ ऽअवन्तु
देवाः स्वाहा ॥ ४२ ॥

ॐ स्योना प्पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छानः शर्म्म सप्प्रथाः स्वाहा ॥ ४३ ॥

आज्याहुतिं जुहुयादनेन मन्त्रेण । ॐ यदिष्टं यच्च पूर्तं यच्चापद्यनापदि । प्रजापतौ तन्मनसि जुहोमि विमुक्तोऽहं देवकिल्विषात्स्वाहा । इदं प्रजापतये न मम । ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ॐ इषे त्वोर्ज्जेत्वा व्वायवस्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मण ऽआप्प्यायद्ध्वमग्घ्न्या ऽइन्द्राय भागम्प्रजावतीरनमीवा ऽअयक्ष्मा मावस्तेन ऽईशतमाघशᳬ सोद्ध्रुवा ऽअस्मिन्गोपतौ स्यातवह्वीर्यजमानस्य पशून्पाहि । ॐ अग्ग्ने ऽआयाहि वीतये गृणानो हव्यदातये । निहोता सत्सिबर्हिषि । ॐ शन्नो देवोरभिष्टय ऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥ ततश्चरोरुत्तरार्धादसंसृष्टामाहुतिभिर्जुहोति स्विष्टकृतम् । स्रुवेणैव ॥ ॐ अग्नये स्विष्टकृते स्वाहा । इदमग्नये स्विष्टकृते न मम । इति हुतशेषाऽऽज्यस्य प्रोक्षणीपात्रे प्रक्षेपः । आज्येन प्रायश्चित्तहोमः । ॐ भूः स्वाहा । इदमग्नये न मम । ॐ भुवः स्वाहा । इदं वायवे न मम । ॐ स्वः स्वाहा । इदं सूर्याय न मम । ॐ त्वन्नो ऽअग्ग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो ऽअवया-

सिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्श्वा द्वेषाꣳसि प्प्रमुमुग्ध्यस्म्मत्स्वाहा । इदमग्नीवरुणाभ्यां न मम । ॐ स त्वन्नो ऽअग्ने वमोभवोती नेदिष्ठो ऽअस्या ऽउषसो व्व्युष्टौ । अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽएधि स्वाहा ।। इदमग्नीवरुणाभ्यां न मम । ॐ अयाश्चाग्नेस्यनभिशस्ति पाश्श्च सत्यमित्वमया ऽअसि । अयानो यज्ञं व्वहास्ययानो धेहि भेषजꣳ स्वाहा ।। इदमग्नये अयसे न मम ।। ॐ ये ते शतं व्वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्न्नो ऽअद्य सवितोत व्विष्णुर्व्विश्श्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ।। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ।। ॐ उदुत्तमं व्वरुण पाशमस्म्मदवाधमं व्विमध्यमꣳ श्श्रथाय । अथा व्वयमादित्य व्व्रते तवानागसो ऽअदितये स्याम स्वाहा ।। इदं वरुणायादित्यायादितये न मम ।। ॐ प्रजापतये स्वाहा ।। इदं प्रजापतये न मम ।। इति नवाहुतयः ।।

ततः दिक्पालेभ्य एकतन्त्रेणैकमेव बलिं दद्यात् ।। ॐ प्राच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्व्वाच्यै दिशे स्वाहा प्प्रतीच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहोर्द्ध्वायै दिशे स्वाहार्व्वाच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहा ।। इन्द्रादि-दशदिक्पालेभ्यो नमः ।। इति सम्पूज्य (हस्ते जलं गृहीत्वा) इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्य एतान् सदीपदधिमाषभक्तबलीन् समर्पयामि ।। प्रार्थना ।। भो भो इन्द्रादिदशदिक्पालाः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः मम सकुटुम्बस्य सपरिवारस्य आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः वरदा भवत ।। (ततो हस्ते जलं गृहीत्वा) अनेन बलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम् ।। १ ।। सर्वेभ्यो

ग्रहेभ्यः एकतन्त्रणैकमेव बलिं दद्यात्। ॐ ग्रहा ऽऊर्ज्जाहुतयो व्व्यन्तो व्विप्प्राय मतिम्। तेषां व्विशिप्प्रियाणां व्वोहमिषमूर्ज्जꣳ समग्ग्रभमुपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्म्येष ते योनिरिन्द्राय त्वा जुष्ट्टतमम् ।। ग्रहेभ्यो नमः इति। सम्पूज्य (हस्ते जलं गृहीत्वा) सूर्यादिनवग्रहेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः अधिदेवता-प्रत्यधिदेवता-गणपत्यादिपञ्चलोकपाल-वास्तोष्पतिसहितेभ्यः एतं स-दीप-दधि-माष-भक्तबलिं समर्पयामि ।। (प्रार्थना) भो भो सूर्यादिग्रहाः ! साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः अधिदेवता-प्रत्यधिदेवता-गणपत्यादिपञ्चलोकपाल-वास्तोष्पतिसहिताः मम सकुटुम्बस्य सपरिवारस्य आयुःकर्त्तारः क्षेमकर्त्तारः शान्तिकर्त्तारः पुष्टिकर्त्तारः तुष्टिकर्त्तारः वरदा भवत (हस्ते जलं गृहीत्वा) ।। अनेन बलिदानेन सूर्यादिग्रहाः प्रीयन्ताम्।

सङ्कल्पः ।। अस्मिन् गुरुमण्डलार्चनकर्मणि इमानि हवनीयद्रव्याणि या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम ।। यथा दैवतानि सन्तु ।।

इति कुशकण्डिकाप्रकरणम्।

—:o:—

* अथ क्षेत्रपालबलिदानम् *

एकस्मिन् वंशादिपात्रे कुशानास्तीर्य तदुपरि मनुष्याहारचतुर्गुणं द्विगुणं वा माषदध्योदनं जलपात्रं च निधाय चतुर्मुखं दीपं प्रज्वाल्य हरिद्राकुङ्कुमादिपताकायुतं कृत्वा ।। ॐ नहि स्पशमविदन्नन्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः। एमेनमवृधन्नमृताऽअमर्त्त्यं व्वैश्श्वानरं क्षैत्त्रजित्याय देवाः ।। क्षेत्रपालाय नमः, इति पञ्चोपचारैः षोडशोपचारैर्वा सम्पूज्य प्रार्थयेत्। नमो वै क्षेत्रपालस्त्वं भूतप्रेतगणैः सह। पूजाबलिं गृहाणेमं सौम्यो भवतु सर्वदा ।। १ ।। पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ।।

आयुः स्वास्थ्यञ्च मे देहि निर्विघ्नं कुरु सर्वदा ।। २ ।। ततो बलिदानम्।।(हस्ते जलं गृहीत्वा) ।। क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय मारोगण-भैरव-राक्षस-कूष्माण्ड-वेताल-भूत-प्रेत-पिशाच-डाकिनी-पिशाचिनीगणसहिताय एतं स-दीप-दधि-माष-भक्तबलिं समर्पयामि ।। (प्रार्थना) भो क्षेत्रपाल ! क्षेत्रं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता वरदो भव ।। (हस्ते जलं गृहीत्वा) अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ।। यजमानस्य मस्तकोपरि सकृद्भ्रामयित्वा शूद्रेण बलिं गृहीत्वा चतुष्पथे निक्षिपेत् ।। ततो यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत् हिंकारेणेति मन्त्रेण ।। ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्क्रन्दाय स्वाहा प्प्रोथते स्वाहा प्प्रप्प्रोथाय स्वाहा गन्धाय स्वाहा ग्घ्राताय स्वाहा निविष्ट्टाय स्वाहोपविष्ट्टाय स्वाहा सन्दिताय स्वाहा व्वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्ग्रते स्वाहा कूजते स्वाहा प्प्रबुद्धाय स्वाहा व्विजृम्भमाणाय स्वाहा व्विच्चृत्ताय स्वाहा सꣳहानाय स्वाहोपस्त्थिताय स्वाहायनाय स्वाहा प्प्रायणाय स्वाहा ।। यजमानः पाणिपादाः प्रक्षाल्याऽऽचम्य ।। ततः नारिकेलफलं रक्तवस्त्रवेष्टितं द्वादशषट्चतुःस्रुवेण गृहीतमाज्यं स्रुच्यां कृत्वा तस्योपरि नारिकेलफलं संस्थाप्य ॐ पूर्णाहुत्यै नमः इति षोडशोपचारैः सम्पूज्य, पूर्णाहुतिं जुहुयात् । तत्र मन्त्रः ।। पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्क्रीणावहा ऽइषमूर्ज्जꣳ शतक्क्रतो स्वाहा ।। १५ ।। इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यश्च न मम ।। ततोऽग्नि प्रदक्षिणीकृत्य पश्चिमदेशे प्राङ्मुख उपविश्य ।। ततः स्रुवेण भस्मानीय अनामिकया ॐ त्र्यायुषञ्जमदग्नेः, इति ललाटे ।। कश्यपस्य त्र्यायुषम्, इति ग्रीवायाम् ।। यद्देवेषु त्र्यायुषम्,

इति दक्षिणवाहुमूले ।। तन्नो ऽअस्तु त्र्यायुषमिति हृदि ।। संस्रव-प्राशनम् ।। आचमनम् ।। पवित्राभ्यां मार्जनम् ।। अग्नौ पवित्रप्रतिपत्तिः ।।

※ अथ गुरुपूजा ※

कर्त्ता कृतनित्यक्रियः कृतोपवासः कृतमाङ्गलिकस्नानः स्वलङ्कृतः सौभाग्यकुङ्कुमेन कृततिलको बद्धशिखः कम्बलादौ प्रागग्रे स्वासने उपविश्य रक्षादीपं प्रज्वलय्य पवित्रपाणिः स्मार्त-विधिना द्विराचम्य प्राणानायम्य पूजनसामग्रीमत्मानं च संप्रोक्ष्य पाद्यपात्रं निधाय तत्र गन्ध-पुष्प-अक्षत-श्यामाक-दूर्वा-विष्णुक्रान्ता-तुलसीर्दत्वा तदुत्तरतोऽर्घ्यपात्रं निधाय तत्र गन्ध-पुष्प-यव-कुश-तिल-गौरसर्षप-दूर्वा-तुलसीः प्रक्षिप्य तदुत्तरत आचमनीयपात्रे एला-लवङ्ग-कर्पूर-कङ्कोल-जातीफल-उशीराणि प्रक्षिप्य पात्रत्रयेऽपि जलमापूर्य दधि-मधु-सर्पींषि मधुपर्कपात्र दत्वा गायत्र्या पाद्यद्रव्याणि प्रणवेनार्घ्यम्, व्याहृतिभिराचमनीयम् गायत्र्या मधुपर्कमभिमन्त्र्य गन्ध-पुष्प-वस्त्र-आभरणादि पूजाद्रव्याणि गायत्र्याऽभिमृशेत् ।

ततो नवकोष्ठां भूमिं सम्पाद्य पूर्वादितो मध्ये च दुग्ध-दधि-घृत-मधु-शर्करेति पञ्चामृत-पात्राणि निधाय विदिक्षु सुगन्धि-तैलामलकचूर्ण-सुगन्धितोदकानि विन्यस्य स्थापनक्रमेण नवसु पात्रेषु सद्रव्येषु नवदेवताः पूजयेत्—

१. ॐ विद्यायै नमः । २. ॐ अविद्यायै नमः । ३. प्रकृत्यै नमः । ४. ॐ मायायै नमः । ५. ॐ तेजस्विन्यै नमः । ६. ॐ प्रबोधिन्यै नमः । ७. ॐ सत्याय नमः । ८. ॐ रजसे नमः । ९. ॐ तमसे नमः । इति सम्पूज्य गायत्र्याऽभिमृशेत् । स्वशान्ति-पाठं पठेत् । तद्यथा—

ॐ आनो भद्द्रा: क्क्रतवो यन्तु व्विश्श्वतोऽदब्धासो ऽअपरीतास ऽउद्भिद: । देवा नो यथा सदमिद् वृधे ऽअसन्नप्प्रायुवो रक्षितारो दिवे दिवे ।। १ ।।

देवानाम्भद्द्रा सुमति ऽऋजूयतान्देवानाꣳ रातिरभि नो निवर्त्तताम् । देवानाꣳ सख्यमुपसेदिमा व्वयन्देवा न ऽआयु: प्रतिरन्तु जीवसे ।। २ ।।

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् ।
पूषा नो यथा व्वेदसा मसद् वृधे रक्षिता पायुरदब्ध: स्वस्तये ।।३।।

स्वस्ति नऽ इन्द्रो व्वृद्धश्श्रवा: स्वस्ति न: पूषा व्विश्श्ववेदा: ।
स्वस्ति नस्तार्क्ष्यो ऽअरिष्ट्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ।।४।।

द्यौ: शान्तिरन्तरिक्षꣳ शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: । व्वनस्पतय: शान्तिर्व्विश्श्वे देवा: शान्तिर्ब्ब्रह्म शान्ति: सर्वठं शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरेधि ।।५।।

गणानान्त्वा गणपतिठं हवामहे प्रियाणां त्वा प्रियपतिठं हवामहे निधीनां त्वा निधिपतिठं हवामहे व्वसो मम । आऽहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम् ।। ६ ।।

अम्बे ऽअम्बिकेऽम्बालिके न मा नयति कश्चन ।
स सस्त्यश्वक: सुभद्द्रिकाङ्काम्पीलवासिनीम् ।।
ॐ लक्ष्मीनारायणाभ्यां नम: । ॐ उमामहेश्वराभ्यां नम: ।
ॐ वाणीहिरण्यगर्भाभ्यां नम: । ॐ शचीपुरन्दराभ्यां नम: ।
ॐ मातृपितृचरणकमलेभ्यो नम: । ॐ इष्टदेवताभ्यो नम: ।
ॐ कुलदेवताभ्यो नम: । ॐ ग्रामदेवताभ्यो नम: ।
ॐ स्थानदेवताभ्यो नम: । ॐ वास्तुदेवताभ्यो नम: ।
ॐ सर्वेभ्यो देवेभ्यो नम: । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नम: ।

ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः ।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

अभीप्सितार्थसिध्यर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ।
देवा दिशन्ति नः सिद्धिं ब्रह्मेशानजनार्दनाः ।।
विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ।।

ततः प्रधानसंकल्पं कुर्यात् । स्वदक्षिणहस्ते अर्घ्यपात्रे कुशत्रयकुसुमयवफलद्रव्यजलादीन्यादाय । ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे सारस्वतप्रदेशे (अविमुक्तवाराणसीक्षेत्रे महाश्मशाने आनन्दवने गौरीमुखे त्रिकण्टकविराजिते भागीरथ्याः पश्चिमे तीरे) विक्रमशके बौद्धावतारे अमुकनाम्नि संवत्सरे अमुकायने अमुकर्तौ ॐ तत्सदद्य महामाङ्गल्यप्रदमासोत्तमे मासे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेसु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषणविशिष्टायाममुकगोत्रः अमुकप्रवरान्वितोऽमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्मा (वर्मा, गुप्तः) समस्तभय-व्याधि-जरा-पीडा-मृत्यु-परिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्यर्थम्, आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयोपशान्तिपूर्वकं धर्मार्थकाममोक्षादिफलप्राप्त्यर्थं सर्वलोककल्याणार्थं च श्रीव्यासपूजां करिष्यामि । तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिस्मरणमात्रं च करिष्ये । इति गणेशं सम्पूज्य—

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।

पुण्डरीकाक्षः पुनातु । इति मन्त्रेण पूजनसामग्रीं सम्प्रोक्ष्य ।

ततः—

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

ॐ परमसुखासनाय नमः । इत्यासनं सम्पूज्य—

ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥

इति भैरवाज्ञां गृहीत्वा—

ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः ।
तेषाꣳ सहस्रयोजनेऽव धन्न्वानि तन्न्मसि ॥

इति छोटिकया दिग्बन्धनं कृत्वा 'ॐ भैरवाय नमः' इति वामपादेन भूमिं त्रिः सन्ताड्य—

ॐ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने ।
तिष्ठ देवि शिखामध्ये चामुण्डे चापराजिते ॥

इति शिखां बद्ध्वा । स्ववामभागे पूजाकलशं संस्थाप्य तत्र

ॐ इमम्मे व्वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥

इति मन्त्रेण वरुणं सम्पूज्य गायत्र्या दशवारमभिमन्त्र्य—

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥

सर्वे समुद्राः सरितः तीर्थानि जलदाः नदाः ।
आयान्तु देवपूजार्थे दुरितक्षयकारकाः ॥

इति तीर्थान्यावाह्य—

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ।।

* अथ पीठपूजा *

गन्धपुष्पाक्षतैः पीठोपरि मध्ये—

ॐ आं आधारशक्त्यै नमः । ॐ कूं कूर्माय नमः । ॐ ॐ अनन्ताय नमः । ॐ पं पृथिव्यै नमः । ॐ क्षीं क्षीरसमुद्राय नमः । ॐ श्वें श्वेतद्वीपाय नमः । ॐ मं महिमण्डलाय नमः । ॐ कं कल्पवृक्षाय नमः । ॐ रं रत्नवेदिकायै नमः । ॐ रं रत्नसिंहासनाय नमः । ॐ सं सर्वशक्तिकमलासनाय नमः ।

पीठदक्षिणे—ॐ दुर्गायै नमः । वामे—ॐ विघ्नेशाय नमः । अग्रे—ॐ गरुडाय नमः । ईशान्याम्—ॐ क्षेत्रपालाय नमः । आग्नेये—ॐ गणेशाय नमः । नैर्ऋत्ये—ॐ सरस्वत्यै नमः । वायव्ये—ॐ लक्ष्म्यै नमः । ततः—आवाहितपीठदेवताभ्यो नमः । इति गन्धाक्षतपुष्पाणि सम्पूज्य पुष्पाञ्जलिं दद्यात्—

'सत्यज्ञानमनन्तरूपं परं धामैव सकलं पीठम् ।' इति ।।

ध्यानम्—श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवम्
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीरान् द्व्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकम्
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ।।

अथावरणपूजा—

(१) बिन्दौ—ॐ वेदव्यासाय नमः व्यासं पूजयामि । पञ्चोपचारैः सम्पूज्य ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ।।

इति पुष्पाञ्जलिं क्षिपेत् ।

(२) त्रिकोणे—ॐ ब्रह्मणे नमः ब्रह्माणं पू०[1] १ । ॐ रुद्राय नमः रुद्रं पू० २ । ॐ कृष्णाय नमः कृष्णं पू० ३ ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

(३) षट्कोणे—ॐ [2]वासुदेवाय नमः वासुदेवं पू० १ । संकर्षणाय नमः सङ्कर्षणं पू० २ । प्रद्युम्नाय० प्रद्युम्नं पू० ३ । अनिरुद्धाय० अनिरुद्धं पू० ४ । वैशंपायनाय० वैशंपायनं पू० ५ । सुमन्तवे० सुमन्तुं पू० ६ ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

(४) अष्टदले—ॐ जैमिनये० जैमिनिं० १ । पैलाय० पैलं० २ । गौडपादाचार्याय० गौडपादाचार्यं० ३ । गोविन्दाचार्याय० गोविन्दाचार्यं० ४ । शंकराचार्याय० शंकराचार्यं० ५ । नृसिंहाचार्याय० नृसिंहाचार्यं० ६ । महेश्वराचार्याय० महेश्वराचार्यं० ७ । भास्कराचार्याय० भास्कराचार्यं० ८ ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ।

(५) दशदले—ॐ महेन्द्राचार्याय० महेन्द्राचार्यं० १ । माधवाचार्याय० माधवाचार्यं० २ । जिष्ठाचार्याय० जिष्ठाचार्यं० ३ । विश्वरूपाचार्याय० विश्वरूपाचार्यं० ४ । पद्मपादाचार्याय० पद्मपादाचार्यं० ५ । हस्तामलकाचार्याय० हस्तामलकचार्यं० ६ । त्रोटकाचार्याय० त्रोटकाचार्यं० ७ । श्रीशुकाय० श्रीशुकं० ८ । वसिष्ठाय० वसिष्ठं० ९ । अरुन्धत्यै० अरुन्धतीं० १० ।

---

[1] पू० का अर्थ है 'पूजयामि' । [2] सब नामोंसे पूर्व ॐ बोलें ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

(६) द्वादशदले—ॐ सनकाय नमः सनकमावाहयामि स्थापयामि १ । सनन्दनाय नमः सनन्दनमावाहयामि स्थापयामि २ । सनातनाय नमः सनातनमावाहयामि स्थापयामि ३ । सनत्कुमाराय नमः सनत्कुमारमावाहयामि स्थापयामि ४ । कपिलाय नमः कपिलं० ५ । ऋषभदेवाय नमः ऋषभदेवं० ६ । दत्तात्रेयाय नमः दत्तात्रेयं० ७ । नारदाय नमः नारदं० ८ । संवर्त्ताय नमः संवर्त्तं० ९ । श्वेतकेतवे नमः श्वेतकेतुं० १० । आसुरये नमः आसुरिं० ११ । पंचशिखाय नमः पंचशिखमावाहयामि स्थापयामि १२ ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम् ॥

(७) चतुर्दशदले—दुर्वाससे नमः दुर्वाससं० १ । जडभरताय नमः जडभरतं० २ । रैवताय नमः रैवतं० ३ । वामदेवाय नमः वामदेवं० ४ । द्रविडाचार्याय नमः द्रविडाचार्यं० ५ । गोविन्दभगवत्पूज्यपादाचार्याय नमः गोविन्दभगवत्पूज्यपादाचार्यं० ६ । गौडपादाचार्याय नमः गौडपादाचार्यं० ७ । विवरणाचार्याय नमः विवरणाचार्यं० ८ । समस्तब्रह्मविद्याप्रवर्त्तकाचार्येभ्यो नमः समस्तब्रह्मविद्याप्रवर्त्तकाचार्यान्० ९ । गुरवे नमः गुरुम्० १० । परमगुरवे नमः परमगुरुम्० ११ । परमेष्ठिगुरवे नमः परमेष्ठिगुरुम्० १२ । परात्परगुरवे नमः परात्परगुरुम्० १३ । समस्तब्रह्मविद्यासम्प्रदायिभ्यो नमः समस्तब्रह्मविद्यासम्प्रदायिनान् आवाहयामि स्थापयामि १४ ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

(८) षोडशदले—आत्मने नमः आत्मानम्० १ । अन्तरात्मने नमः अन्तरात्मानं० २ । परमात्मने नमः परमात्मानं० ३ । सर्वात्मने नमः सर्वात्मानं० ४ । परब्रह्मणे नमः परब्रह्मणं० ५ । दिव्यौघगुरवे नमः दिव्यौघगुरुम्० ६ । परमप्रकाशानन्दनाथाय नमः परमप्रकाशानन्दनाथं० ७ । परमेशानन्दनाथाय नमः परमेशानन्दनाथं० ८ । परशिवानन्दनाथाय नमः परशिवानन्दनाथं० ९ । कामेश्वरानन्दनाथाय नमः कामेश्वरानन्दनाथं० १० । मोक्षानन्दनाथाय नमः मोक्षनन्दनाथं० ११ । कामानन्दनाथाय नमः कामानन्दनाथं० १२ । अमृतानन्दनाथाय नमः अमृतानन्दनाथं० १३ । सिद्धौघगुरुभ्यो नमः सिद्धौघगुरून्० १४ । ईशानानन्दनाथाय नमः ईशानानन्दनाथं० १५ । तत्पुरुषानन्दनाथाय नमः तत्पुरुषानन्दनाथं० १६ ।

अष्टादशदले—अघोरानन्दनाथाय नमः अघोरानन्दनाथं० १ । वामदेवानन्दनाथाय नमः वामदेवानन्दनाथं० २ । सद्योजातानन्दनाथाय नमः सद्योजातानन्दनाथं० ३ । मानवौघगुरवे नमः मानवौघगुरुम्० ४ । पञ्चोत्तरानन्दनाथाय नमः पञ्चोत्तरानन्दनाथं० ५ । परमानन्दनाथाय नमः परमानन्दनाथं० ६ । सर्वज्ञानानन्दनाथाय नमः सर्वज्ञानानन्दनाथं० ७ । सर्वानन्दनाथाय नमः सर्वानन्दनाथं० ८ । सिद्धानन्दनाथाय नमः सिद्धानन्दनाथं० ९ । गोविन्दानन्दनाथाय नमः गोविन्दानन्दनाथं० १० । शङ्करानन्दनाथाय नमः शङ्करानन्दनाथ० ११ । उड्डीशानन्दनाथाय नमः उड्डीशानन्दनाथं० १२ । प्रकाशानन्दनाथाय नमः प्रकाशानन्दनाथं० १३ । विमर्शानन्दनाथाय नमः विमर्शा-

नन्दनाथं० १४ । आनन्दानन्दनाथाय नमः आनन्दानन्दनाथं० १५ । षष्ठीशानन्दनाथाय नमः षष्ठीशानन्दनाथं० १६ । ज्ञानानन्दनाथाय नमः ज्ञानानन्दनाथं० १७ । सत्यानन्दनाथाय नमः सत्यानन्दनाथं० १८ ।

विंशतिदले—पूर्णानन्दनाथाय नमः पूर्णानन्दनाथं० १ । मित्रेशानन्दनाथाय नमः मित्रेशानन्दनाथं० २ । स्वभावानन्दनाथाय नमः स्वभावानन्दनाथं० ३ । प्रतिमानन्दनाथाय नमः प्रतिमानन्दनाथं० ४ । सुभगानन्दनाथाय नमः सुभगानन्दनाथं० ५ । कौलेश्वरानन्दनाथाय नमः कौलेश्वरानन्दनाथं० ६ । कुलेश्वरानन्दनाथाय नमः कुलेश्वरानन्दनाथं० ७ । भोजानन्दनाथाय नमः भोजानन्दनाथं० ८ । विश्वानन्दनाथाय नमः विश्वानन्दनाथं० ९ । विमलानन्दनाथाय नमः विमलानन्दनाथं० १० । मदनानन्दनाथाय नमः मदनानन्दनाथं० ११ । भुवनानन्दनाथाय नमः भुवनानन्दनाथं० १२ । लीलानन्दनाथाय नमः लीलानन्दनाथं० १३ । स्वात्मानन्दनाथाय नमः स्वात्मानन्दनाथं० १४ । प्रियानन्दनाथाय नमः प्रियानन्दनाथं० १५ । अस्मद्गुरुभ्यो नमः अस्मद्गुरून्० १६ । एवमन्यकर्णिकायामपि 'अस्मद्गुरुभ्यो नमः' इत्युक्त्वा आवाहनं स्थापनं च कुर्यात् ।

ततः भूपुरे—पूर्वे इन्द्राय नमः इन्द्रमा० । आग्नेये० अग्निमा० । दक्षिणे यमाय नमः यममा० । नैर्ऋत्ये निर्ऋतये नमः निर्ऋतिमा० । पश्चिमे वरुणाय नमः वरुणमा० । वायव्ये वायवे नमः वायुमा० । उत्तरे सोमाय नमः सोममा० । ऐशान्यां ईशानाय नमः ईशानमा० । ईशानपूर्वयोर्मध्ये—ब्रह्मणे नमः ब्रह्माणमा० । निर्ऋतिवरुणयोर्मध्ये अनन्ताय नमः अनन्तमा० ।

ततः—ॐ व्विश्वतश्चक्षुरुत व्विश्श्वतो मुखो व्विश्श्वतो बाहुरुत व्विश्श्वतस्प्पात् । सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमी

जनयन्देव ऽएकः ।

इति मन्त्रेण प्रधानदेवस्य पाद-नाभि-वक्षःस्थलादि स्पृशेत् । प्रत्यालम्भनं मन्त्रावृत्तिः ।

ध्यानम्—ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥ १ ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ २ ॥

ॐ बृहस्पते सवितर्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि । व्वर्द्धयैनम्महते सौभगाय व्विश्श्व ऽएनमनु मदन्तु देवाः ॥

आवाहनम्—संसारवृक्षमारूढं पतितं नरकार्णवम् ।
येन तूद्धवरितं तूर्णं तस्मै श्रीगुरवे नमः ॥

ॐ बृहस्प्पते परिदीया रथेन रक्षोहा मित्त्राँ२ ऽअपब्बाधमानः । प्प्रभञ्जन्त्सेनाः प्प्रमृणो युधा जयन्नस्म्माकमेद्ध्यविता रथानाम् ॥

आसनम्—त्वमेव शरणं देव नान्यथा शरणं मम ।
अतः कारुण्यभावेन रक्ष मां शरणागतम् ॥

ॐ बृहस्प्पते ऽअति यदर्य्यो ऽअर्हा द्द्युमद्द्विभाति क्क्रतुमज्जनेषु । यद्दीदयच्छवस ऽऋत प्रजात तदस्मासुद्द्रविणं धेहि चित्त्रम् । उपयाम गृहीतोसि बृहस्प्पतये त्वैषते योनिर्ब्बृहस्प्पतये त्वा ॥

पाद्यम्—त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव व्विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ! ॥

ॐ बृहस्प्पते व्वाजञ्जय बृहस्प्पतये व्वाचं व्वदत बृहस्प्पतिं व्वाजञ्जापयत । इन्द्र व्वाजञ्जयेन्द्राय व्वाचं व्वदतेन्द्रं व्वाजञ्जापयत ॥

अर्घ्यम्—आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ।

ॐ आकूत्यै प्प्रयुजेग्ग्नयें स्वाहा मेधायै मनसेग्ग्नये स्वाहा दीक्षायै तपसेग्ग्नये स्वाहा सरस्वत्यै पूष्ष्णंग्ग्नये स्वाहा। आपो देवीर्हता व्विश्श्वशम्भुवो द्द्यावापृथिवी : ऽउरो ऽअन्तरिक्ष। बृहस्प्पतये हृविषा व्विधेम स्वाहा ॥

आचमनीयम्—अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

ॐ स प्प्रथमो बृहंस्प्पतिश्चिच्चकित्त्वाँस्तस्म्मा ऽइन्द्राय सुतमाजुहोत स्वाहा। तृम्पन्तु होत्त्रा मद्ध्वो याः स्विष्ट्टा याः सुप्प्रीताः सुहुता यत्स्वाहा याऽग्ग्नीत् ॥

स्नानीयम्—ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम्।
मन्त्रमूलं गुरोर्वाक्क्यं मोक्षमूलं गुरोः कृपा ॥

ॐ देवस्याहॅं सवितुः सवे सत्त्यप्प्रसवसो बृहस्प्पतेर्व्वाजजितो व्वाजञ्जेषम्। व्वाजिनो व्वाज जितोद्ध्वनस्क्कभ्भ्नुवन्तो योजना मिमानाः काष्ठाङ्गच्छत ॥

पुनराचमनीयम्—न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥
गङ्गा–सरस्वती–रेवा–पयोष्णी–नर्मदा जलैः।
स्नापितोऽसि मया देव ! तथा शान्ति कुरुष्व मे॥

ॐ अग्ग्नये त्त्वा मह्यं व्वरुणो ददातु सोमृतत्त्वमशीयायुर्द्दात्त्र ऽएधि मयो मह्यम्प्रतिग्ग्रहीत्त्रे रुद्द्राय त्त्वा मह्यं व्वरुणो ददातु सोमृतत्त्वमशीयप्प्राणो दात्त्र ऽएधि व्वयो मह्यम्प्रतिग्ग्रहीत्त्रे बृहस्प्पतये त्त्वा मह्यं व्वरुणो ददातु सोमृतत्त्वमशीय त्त्वग्ग्द्रात्त्र ऽएधि मयो मह्यम्प्रतिग्ग्रहीत्त्रे यमाय त्त्वा मह्यं व्वरुणो ददातु सोमृतत्त्वमशीय हयो दात्त्र ऽएधि व्वयो मह्यम्प्रतिग्ग्रहीत्त्रे ॥

पञ्चामृतम्—पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु ।
शर्करा च समायुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ एषा वः सा सत्त्या संव्वागभूद्द्यया बृहस्प्पतिं व्वाजमजीजपताजीजपत बृहस्प्पतिं व्वाजं व्वनस्प्पतयो व्विमुच्च्यद्ध्वम् । एषा वः सा सत्त्या संव्वागभूद्द्ययेन्द्रं व्वाजमजीजपताजीजपतेन्द्रं व्वाजं व्वनस्प्पतयो व्विमुच्च्यद्ध्वम् ॥
पञ्चामृतस्नानं समर्पयामि ।

शुद्धोदकस्नानम्—यत्तेजसा जगद्व्याप्तं यतो जातमिदं जगत् ।
तस्मै ते जगदाधार स्नानार्थं तोयमर्पये ॥

ॐ सोमꣳ राजानमवसेग्ग्निमन्न्वारभामहे । आदित्त्यान्न्विष्ण्णुꣳ सूर्य्यम्ब्रह्माणञ्च बृहस्प्पतिꣳ स्वाहा ॥
शुद्धोदकस्नानं समर्पयामि ।

ततो गन्धाक्षतैः सम्पूज्य धारापात्रे अभिषेकार्थं गन्ध-पुष्प-सुगन्धद्रव्य-दुग्धादि निक्षिप्य ईश्वरोपरि पुरुषसूक्तेन महाभिषेकं कुर्यात् । ततः—

वस्त्रम्—शीतवातोष्णसन्त्राणं लज्जाया रक्षणं परम् ।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे ॥

ॐ अर्य्यमणम्बृहस्प्पतिमिन्द्रन्दानाय चोदय ।
व्वाचं व्विष्ण्णुꣳ सरस्वतीꣳ सवितारञ्च व्वाजिनꣳ स्वाहा ॥
वस्त्रं समर्पयामि ।

वस्त्रान्ते आचमनीयं जलम्—

ॐ प्र नो यच्छत्त्वर्य्यमा प्प्र पूषा प्प्र बृहस्प्पतिः ।
प्र वाग्ग्देवी ददातु नः स्वाहा ॥

उपवस्त्रम्—सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

ॐ स्वस्ति न ऽइन्द्रो व्वृद्धश्श्रवाः स्वस्ति नः पूषा व्विश्श्ववेदाः। स्वस्ति नस्ताक्ष्र्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु ॥

उपवस्त्रं समर्पयामि ।

उपवस्त्रान्ते आचमनीयं जलम्—

ॐ अमुत्र भूयादध यद्यमस्य बृहस्प्पते ऽअभिशस्तेरमुञ्चः । प्रत्यौहतामश्श्विना मृत्युमस्म्माद्देवानामग्ग्ने भिषजा शचीभिः ॥

यज्ञोपवीतम्—यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
यज्ञोपवीतं समर्पयामि ।

ॐ देवस्य त्वा सवितुः प्प्रसवेश्श्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताब्भ्याम् । सरस्वत्यै व्वाचो यन्तुर्य्यन्त्रिये दधामि बृहस्प्पतेष्ट्वा साम्म्राज्ज्येनाभिषिञ्चामि ॥ यज्ञोपवीतान्ते जलं समर्पयामि ।

गन्धम्—नमोऽस्तु गुरवे तस्मै इष्टदेवस्वरूपिणे ।
यस्य वागमृतं हन्ति द्विषं संसारसंज्ञकम् ॥
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

ॐ त्वां गन्धर्वा ऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ।
त्वामोषधे सोमो राजा व्विद्वान्न्यक्ष्मादमुच्च्यत ॥

(कनिष्ठामूलगताङ्गुष्ठयोगेन गन्धमुद्रां प्रदर्श्य अनामिकया) गन्धानुलेपनं समर्पयामि ।

अक्षतान्—अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभिताः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ! ॥

ॐ अक्षन्नमी मदन्त ह्यव प्प्रिया ऽअधूषत । अस्तोषत स्वभानवो व्विप्प्रानविष्ठ्या मती योजान्विन्द्र ते हरी ॥
अक्षतान् समर्पयामि ।

मालाम्—माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ! ।
मयाऽऽहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥
(तर्जन्यङ्गुष्ठयोगेन) पुष्पमालां समर्पयामि ।

ॐ ओषधीः प्प्रतिमोदद्ध्वं पुष्ष्पवतीः प्प्रसूवरीः ।
अश्वा ऽइव सजित्त्वरीर्व्वीरुधः पारयिष्ण्वः ॥

पुष्पम्—पुष्पं मनोहरं रम्यं सुगन्धं देवनिर्मितम् ।
मया निवेदितं भक्त्या पुष्पमेतत्प्रगृह्यताम् ॥

ॐ श्रीश्च ते लक्ष्मीश्श्च पत्क्न्यावहोरात्त्रे पाश्श्र्वे नक्षत्त्राणि रूपमश्श्विनौ व्व्यात्तम् । इष्ष्णन्निषाणामुम्म ऽइषाण सर्व्वलोकम्म ऽइषाण ॥

भूषणम्—विश्वाभरणभूताय विश्वशोभैकयोनये ।
मया विग्रहभूषार्थं भूषणानि समर्पये ॥

ॐ दृशानो रुक्क्म ऽउर्व्व्या व्व्यद्द्यौद्दुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो ऽअभवद्वयोभिर्यदेनन्द्द्यौरजनयत्सुरेताः ॥

तुलसीपत्राणि—तुलसीं हेमरूपां च रत्नरूपां च मञ्जरीम् ।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम् ॥

ॐ यत्पुरुषं व्व्यदधुः कतिधा व्व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा ऽउच्च्येते ॥

१ ॐ केशवाय नमः । २ ॐ नारायणाय नमः । ३ ॐ गोविन्दाय नमः । ४ ॐ विष्णवे नमः । ५ ॐ मधुसूदनाय नमः । ६ ॐ त्रिविक्रमाय नमः । ७ ॐ वामनाय नमः । ८ ॐ श्रीधराय नमः । ९ ॐ हृषीकेशाय नमः । १० ॐ पद्मनाभाय नमः । ११ ॐ दामोदराय नमः । १२ ॐ सङ्कर्षणाय नमः । १३ ॐ वासुदेवाय नमः । १४ ॐ अनिरुद्धाय नमः । १५ ॐ पुरुषोत्तमाय नमः । १६ ॐ अधोक्षजाय नमः । १७ ॐ नरसिंहाय नमः ।

१८ ॐ अच्युताय नमः। १९ ॐ जनार्दनाय नमः। २० ॐ उपेन्द्राय नमः। २१ ॐ हरये नमः। २२ ॐ कृष्णाय नमः। २३ ॐ प्रणवाय नमः। २४ ॐ माधवाय नमः।

दूर्वा—दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गलप्रदान्।
आनीतांस्तव पूजार्थं गृहाण परमेश्वर ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च ॥

अबीरगुलालकद्रव्याणि—नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं गन्धं चारु प्रगृह्यताम् ॥

ॐ अहिरिव भोगैः पर्य्येति बाहुञ्ज्याया हेतिम्परिबाधमानः। हस्तग्घ्नो व्विश्वा व्वयुनानि व्विद्द्वान्पुमान्पुमाꣳसम्परिपातु व्विश्वतः ॥

धूपम्—वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्वभूतानां धूपो घ्राणाय तेऽर्प्यते ॥

ॐ व्वसवस्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्द्रास्त्वा धूपयन्तु त्रैष्टुभेन च्छन्दसाङ्गिरस्वदादित्त्या स्त्वा धूपयन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्श्वे त्वा देवा व्वैश्वानरा धूपयन्त्वानुष्ट्टुभेन च्छन्दसाङ्गिरस्वदिन्द्रस्त्वा धूपयतु व्वरुणस्त्वा धूपयतु व्विष्णुस्त्वा धूपयतु ॥

(तर्जनीमूलयोरङ्गुष्ठयोगेन धूपमुद्रां प्रदर्श्य) धूपमाघ्रापयामि।

दीपम्—सुप्रकाशो महादीप्तः सर्वतस्तिमिरापहः।
सबाह्याभ्यन्तरज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥

ॐ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्य्यो ज्ज्योतिज्ज्योतिः सूर्य्यः स्वाहा। अग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो

वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा । ज्ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा ॥

(मध्यमाङ्गुष्ठयोगेन दीपमुद्रां प्रदर्श्य) दीपं दर्शयामि । हस्तप्रक्षालनम् ॥

नैवेद्यम्—(देवस्याग्रे चतुरस्रं मण्डलं कृत्वा तन्मध्ये नैवेद्यपात्रं जलपात्रं च संस्थाप्य)—

नैवेद्यं स्वादुसंयुक्तं नानाभक्ष्यसमन्वितम् ।
निवेदयामि भक्त्येदं जुषाण परमेश्वर ॥

ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्म्मिणः । प्र प्प्रदातारन्तारिष ऽऊर्जन्नो धेहि द्द्विपदे चतुष्प्पदे ॥

नैवेद्यं निवेदयामि । (अनामामूलयोरङ्गुष्ठयोगेन नैवेद्यमुद्रां प्रदर्श्य ग्रासमुद्राः प्रदर्शयेत्— अङ्गुष्ठप्रदेशिनीमध्यमाभिः)—ॐ प्राणाय स्वाहा ॥ १ ॥ (अङ्गुष्ठमध्यमानामिकाभिः)—ॐ अपानाय स्वाहा ॥ २ ॥ (अङ्गुष्ठानामिकाकनिष्ठाभिः)—ॐ व्यानाय स्वाहा ॥ ३ ॥ (कनिष्ठातर्जन्यङ्गुष्ठैः)—ॐ समानाय स्वाहा ॥ ४ ॥ (साङ्गुष्ठाभिः सर्वाभिः)—ॐ उदानाय स्वाहा । (इति प्रदर्श्य) मध्ये पानीयं समर्पयामि । उत्तरापोशनं समर्पयामि ।

पानार्थं सलिलं देव ! कर्पूरादिसुवासितम् ।
सर्वतृप्तिकरं स्वच्छमर्पयामि नमोऽस्तु ते ॥

ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्त ऽआश्विनाः श्येताः श्येताक्षोऽरुणस्ते रुद्द्राय पशुपतये कर्ण्णाया मा ऽअवलिप्ता रौद्रा नभोरूपाः पार्ज्जन्न्याः ॥

हस्तप्रक्षालनार्थे मुखप्रक्षालनार्थे च जलं समर्पयामि ।

करोद्वर्तनार्थे चन्दनम्—चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ।
करोद्वर्तनकं देव ! गृहाण परमेश्वर !

ॐ अꣳशुना ते ऽअꣳशुः पृच्च्यताम्परुषा परुः। गन्धस्ते सोममवतु मदाय रसो ऽअच्च्युतः ॥

ऋतुफलानि—इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्ष्पा याश्च्च पुष्ष्पिणीः। बृहस्प्पति प्प्रसूतास्तानो मुञ्चन्त्वꣳ हसः ॥

सुगन्धितद्रव्यम्—श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ! चन्दनं प्रतिगृह्यताम् ॥

ॐ त्र्यम्बकं य्यजामहे सुगन्धिम्पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात्। त्र्यम्बकं य्यजामहे सुगन्धिम्पतिवेदनम्। उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥

छत्रम्—ॐ क्रव्व्यादमग्निं प्प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्प्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्व्यं व्वहतु प्प्रजानन् ॥

चामरम्—ॐ इमा रुद्द्राय तवसे कपर्द्दिने क्षयद्द्वीराय प्प्रभरामहे मतीः। यथा शमसद् द्विपदे चतुष्प्पदे व्विश्श्वंम्पुष्टङ्ग्रामे ऽअस्मिन्ननातुरम् ॥

व्यजनम्—ॐ व्वायो ये ते सहस्रिणो रथासस्तेभिरागहि। नियुत्वान्त्सोमपीतये ॥

चरणपादुकाम्—ॐ त्रीणि पदा व्विचक्क्रमे व्विष्णुर्ग्गोपा ऽअदाब्भ्यः। अतो धर्म्माणि धारयन् ॥

आदर्शम्—ॐ रूपेण वो रूपमब्भ्यागान्तुथो वो व्विश्श्ववेदा व्विभजतु। ऋतस्य पथा प्प्रेत चन्द्र दक्षिणा व्विस्वः पश्यव्व्यन्तरिक्षं य्यतस्व सदस्यैः ॥

ताम्बूलम्—पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ या ऽओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगम्पुरा । मनैनुबब्भ्रूणामहꣳ शतन्धामानि सप्त च ॥

दक्षिणाः—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेक ऽआसीत् ॥ स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा व्विधेम ॥

कर्पूरार्त्तिकम्—कदलीगर्भसम्भूतं कर्पूरञ्च प्रदीपितम् ।
आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥

ॐ आरात्त्रि पार्थिवꣳ रजः पितुरप्प्रायि धामभिः । दिवः सदाꣳसि बृहती व्वितिष्ठस ऽआत्त्वेषं व्वर्त्तते तमः ॥

मन्त्रपुष्पाञ्जलिम्—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्न्यासन् ।
तेह नाकम्महिमानः सचन्त यत्त्र पूर्वे साद्ध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्य सायिने नमो वयं वैश्रवणाय कुर्महे ।
स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥
कुबेराय वैश्रवणाय महाराजाय नमः ।

ॐ स्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात् सार्वभौमस्सर्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति । (तदप्येष श्लोकोऽभिगीतो) मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे । आविक्षितस्य कामप्रेर्विश्वे देवाः सभासदः ॥ पुष्पाञ्जलिं समर्पयामि ।

व्विश्वतश्च्चक्षुरुत व्विश्श्वतो मुखो व्विश्श्वतो बाहुरुत व्विश्श्वतस्प्पात् । सम्बाहुभ्यान्धमति सम्पतत्त्रैर्द्द्यावाभूमी जनयन्देव ऽएकः ॥

प्रार्थना—शंकरं शंकराचार्यं स्वामिश्रीशंकराश्रमम् ।
सद्गुरुं सद्गुणागारं वन्दे सद्गुणलब्धये ॥ १ ॥
निःश्रेयसाभ्युदयहेतव एव नित्यं यस्येन्द्रियायतनमस्ति विचेष्टमानम् ।
योगीश्वरं यतिमणिंखलुसन्दधानंश्रीशंकराश्रमगुरुं शिरसा नमामि॥२॥
जयतु धर्मसनातनमंडनः जयतु पापशिलोच्चयखण्डनः ।
मनुजमानसमोदविधायकः जयतु वै यतिमण्डलनायकः ॥३॥
भावाधीनः खल्वयं मे प्रयासः शास्त्रस्त्यक्तो मेधया वञ्चितोऽस्मि ।
आचार्याणां पादपद्मानुरागी श्रद्धामुग्धो नोपहास्यः सुधीभिः ॥४॥

श्रीगुरुदेव-स्तोत्रम्

श्रीगुरुदेवं नौमि तमेवं गतमदमानं रहितविकारम् ।
नित्यं ज्ञेयं नित्यं ध्येयं नित्यं गेयं ज्ञानाधारम् ॥ १ ॥
श्रीगुरुदेवं०

ब्रह्मनिधानं शीलविधानं धृतगुणमानं परमोदारम् ।
निग्रहनिष्ठं बुद्धिवरिष्ठं भावजविष्ठं सहितविचारम् ॥ २ ॥
श्रीगुरुदेवं०

अशरणशरणं संशयहरणं लोकाभरणं जगदाधारम् ।
मङ्गलकरणं मङ्गलचरणं मङ्गलभरणं मङ्गलसारम् ॥ ३ ॥
श्रीगुरुदेवं०

अघदलकदनं कुसुमितवदनं शोभासदनं निरहङ्कारम् ।
ज्ञानासक्तं ध्यानारक्तं सर्वविरक्तं शुद्धाचारम् ॥ ४ ॥
श्रीगुरुदेवं०

अतिमृदुहासं वाणिविलासं दिनमणिभासं बहुहितकारम् ।
विनयावनतो परमविनीतो नौमि सदाऽहं गुरुपदचारम् ॥ ५ ॥
श्रीगुरुदेवं०

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥

अपार-संसार-समुद्रमध्ये निमज्जतो मे शरणं किमस्ति ?
गुरो ! कृपालो ! कृपया वदैतत् विश्वेशपादाम्बुजदीर्घनौका ॥

क्षमा-प्रार्थना—मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिण-पदे-पदे ॥
ॐ त्रीणि पदा व्विचक्क्रमे व्विष्णुर्गोपा ऽअदाभ्यः । अतो धर्म्माणि धारयन् ॥

प्रणामः—ॐ नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥

ॐ इदं व्विष्णुर्विचक्क्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाᳪसुरे स्वाहा ॥

स्तुतिः—ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परब्रह्म तस्मै श्रीगुरवे नमः ॥
अखंडमंडलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
त्वमेव शरणं देव नान्यथा शरणं मम ।
अतः कारुण्यभावेन रक्ष मां शरणागतम् ॥
त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥

आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
ध्यानमूलं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदम् ।
मन्त्रमूलं गुरोर्वाक्यं मोक्षमूलं गुरोः कृपा ॥
न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात्परं नास्ति तस्मै श्रीगुरवे नमः ॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति स्मृतिः ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
विष्णवे नमः । विष्णवे नमः । विष्णवे नमः ॥

विसर्जनम्—यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥

आशीर्वादः—श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

अथ ब्रह्मणे पूर्णपात्रदानम् ।

कृतस्य गुरुमण्डलार्चनहोमकर्मणोऽङ्गतया विहितमिदं पूर्णपात्रं सदक्षिणं ब्रह्मणे तुभ्यमहं सम्प्रददे ॥ ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॥ अग्नेः पश्चात् प्रणीताविमोकः ॥ ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥ उपयमनकुशैर्मार्जयेत् । उपयमनकुशानामग्नौ प्रक्षेपः । ब्रह्मग्रन्थिविमोकः ॥

तन्मन्त्रा:—ॐ पय: पृथिव्व्याम्पय ऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधा: । पयस्वती: प्प्रदिश: सन्तु मह्यम् ॥ १ ॥ ॐ पञ्च नद्य: सरस्वतीमपियन्ति सस्रोतस: । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ २ ॥ ॐ व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्कम्भसर्ज्जनीस्त्थो व्वरुणस्य ऽऋतसदन्न्यसि व्वरुणस्य ऽऋतसदनमसि व्वरुणस्य ऽऋतसदनमासीद ॥ ३ ॥ ॐ पुनन्तु मा देवजना: पुनन्तु मनसा धिय: । पुनन्तु व्विश्श्वा भूतानि जातवेद: पुनीहि मा ॥ ४ ॥ ॐ देवस्य त्वा सवितु: प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । सरस्वत्यै व्वाचोयन्त्तुर्यन्त्रिये दधामि बृहस्प्पतेष्ट्टवा साम्म्राज्येनाभिषिञ्चाम्म्यसौ ॥ ५ ॥ देवस्य त्वा सवितु: प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्ताब्भ्याम् । सरस्वत्यै व्वाचो यन्तुर्यन्त्रेणाग्ने: साम्राज्ज्येनाभिषिञ्चामि ॥ ६ ॥ देवस्य त्वा सवितु: प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । अश्श्विनोर्भैषज्ज्येन तेजसे ब्ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्श्रियै यशसेभिषिञ्चामि ॥ ७ ॥ ॐ विश्श्वानि देव सवितर्द्दुरितानि परासुव । यद्भद्द्रन्तन्न ऽआसुव ॥ ८ ॥ धामच्छदग्निरिन्द्रो ब्ब्रह्मा देवो बृहस्प्पति: । सचेतसो व्विश्श्वेदेवा यज्ञम्प्रावन्तु न: शुभे ॥ ९ ॥ त्वं य्यविष्ठ्ठ दाशुषो नॄँ: पाहि श्शृणुधी गिर: । रक्षा तोकमुतत्त्मना ॥ १० ॥ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्ष्मिण: । प्रप्प्रदातारन्तारिष ऽऊर्ज्जन्नो धेहि द्द्विपदे चतुष्ष्पदे ॥ ११ ॥ द्यौ: शान्तिरन्तरिक्षꣳ शान्ति: पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: । व्वनस्प्पतय: शान्तिर्व्विश्श्वे देवा: शान्तिर्ब्ब्रह्म शान्ति: सर्व्वꣳ शान्ति: शान्तिरेव शान्ति: सा मा शान्तिरेधि ॥ १२ ॥ यतो यत: समीहसे ततो नो ऽअभय-

ङ्कुरु । शन्नः कुरु प्प्रजाभ्यो भयन्नः पशुब्भ्यः ॥ १३ ॥ अमृताभिषेकोऽस्तु ॥

* अथाऽऽवाहितदेवतानां विसर्जनम् *

ततो देवताग्निं सातुनयं विसृज्य ॥ ॐ उत्तिष्ठ ब्ब्रह्मणस्प्पते देवयन्तस्त्वेमहे । उप प्रयन्तु मरुतः सुदानव ऽइन्द्र प्राशूर्भवा सचा ॥ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् । इष्टकामार्थसिद्ध्यर्थं पुनरागमनाय च ॥ आवाहितदेवताः स्वस्थाने गच्छत ॥ १ ॥ ॐ यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वां योनिङ्गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सह सूक्क्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥ गच्छ गच्छ सुरश्रेष्ठ ! स्वस्थाने परमेश्वर ! । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ! ॥ यज्ञनारायण स्वस्थाने गच्छ ॥ २ ॥ ॐ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥ मया यत्कृतं यथाकालं यथादेशं यथाशक्ति गुरुमण्डलार्चनाख्यं कर्म तेन श्रीपापापहा महाविष्णुः प्रीयताम् ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ सकुशजलं भूमौ क्षिपेत् करौ सम्पुटीकृत्य ॥ मया यत्कृतं गुरुमण्डलार्चनाख्यं कर्म तत् कालहीनं श्रद्धाहीनं भवतां ब्राह्मणानां वचनात् श्रीसूर्याद्यावाहितदेवताप्रसादात् सर्वविधेः परिपूर्णमस्त्विति भवन्तो ब्रुवन्तु ॥ अस्तु परिपूर्णम् इति ब्राह्मणाः वदेयुः ॥

*** क्षमा-प्रार्थना *** जपच्छिद्रं तपश्छिद्रं यच्छिद्रं शान्तिकर्मणि । सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते ॥ धान्यं धनं पशुं बहुपुत्रलाभं

शतसंवत्सरं दीर्घमायुः ॥ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः । शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥

इति श्रीकाशीस्थ-सुप्रसिद्ध-श्रौतस्मार्तकाण्डि-पण्डितप्रवरभीमसेन-चतुर्वेदात्मजेन श्रीसीतारामचतुर्वेदेन सम्पादितेयं श्रीगुरुमण्डलार्चनपद्धतिः सम्पूर्णा ॥

॥ षोडशमातृकाचक्रम् ॥

पूर्वे

आत्मनः कुलदेवताः १७	लोक मातरः १३	देवसेना ९	मेधा ५
तुष्टिः १६	मातरः १२	जया ८	शची ४
पुष्टिः १५	स्वाहा ११	विजया ७	पद्मा ३
धृतिः १४	स्वधा १०	सावित्री ६	गौरी २ गणेश १

॥ सप्तघृतमातृकाचक्रम् ॥

॥ श्रीः ॥

०
००
०००
००००
०००००
००००००
०००००००

कीर्तिर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती ।
माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥१॥

नवग्रह-चक्रम्


दक्षिण
पूर्व
पश्चिम
उत्तर
बुध
पीत
शुक्र
चन्द्र
बृहस्पति
पीत
रवि
रक्त
मंगल
रक्त
केतु
शनि
राहु



कुण्डस्वरूपम्

योनि १२ अङ्गुल ऊँची १२ अङ्गुल लम्बी ८ अङ्गुल चौड़ी रक्तवर्ण

सफेद ऊपरकी सीढ़ी	४ अंगुल चौड़ी व ४ अंगुल ऊँची	१
लाल उसके नीचेकी	३ अंगुल चौड़ी व ३ अंगुल ऊँची	२
काली उसके नीचेकी	२ अंगुल चौड़ी व २ अंगुल ऊँची	३

सर्वतोभद्र-चक्रम्



चतुःषष्टियोगिनी-चक्रम्


ई.
पू.
आ.
उ.
द.
वा.
प.
नै.
रक्त ३
रक्त २
रक्त १
पीत
रक्त ६४
रक्त ५६
रक्त ४८
रक्त ४०
रक्त ३२
रक्त २४
रक्त १६
रक्त ८
रक्त ६३
रक्त ५५
रक्त ४७
रक्त ३९
रक्त ३१
रक्त २३
रक्त १५
रक्त ७
रक्त ६२
रक्त ५४
रक्त ४६
रक्त ३८
रक्त ३०
रक्त २२
रक्त १४
रक्त ६
रक्त ६१
रक्त ५३
रक्त ४५
रक्त ३७
रक्त २९
रक्त २१
रक्त १३
रक्त ५
रक्त ६०
रक्त ५२
रक्त ४४
रक्त ३६
रक्त २८
रक्त २०
रक्त १२
रक्त ४
रक्त ५९
रक्त ५१
रक्त ४३
रक्त ३५
रक्त २७
रक्त १९
रक्त ११
रक्त ३
रक्त ५८
रक्त ५०
रक्त ४२
रक्त ३४
रक्त २६
रक्त १८
रक्त १०
रक्त २
रक्त ५७
रक्त ४९
रक्त ४१
रक्त ३३
रक्त २५
रक्त १७
रक्त ९
रक्त १

क्षेत्रपाल–चक्रम्


पू०
उ०
प०

श्री–यन्त्रम्



आवरण–यन्त्रम्



गुरुमंडल-यंत्रम्



६० ५२

ⓢ५९ ४ · १ ⓢ५३

	४८			३८			४३	
५१	४७	४९	४१	३७	३९	४६	४२	४४
	५०			४०			४५	
	१८		६	८	५		१३	
२१	१७	१९	११	७	९	१६	१२	१४
	२०			१०			१५	
	३३			२३			२८	
३६	३२	३४	२६	२२	२४	३१	२७	२९
	३५			२५			३०	

५८ · ५४

(57) ३ · २ (55)

५६ ६१

॥ गुरु-पूजनसे पूर्व-कर्मकी विधि ॥

आषाढ शुक्ला पूर्णिमाको शुभ मुहूर्त्तमें वेदीके बोच कुंकुमसे षट्कोण या स्वस्तिक बनाकर उसपर केले या पलाशका पत्ता बिछा दे और उसके पश्चिममें गुरुजी (श्रीस्वामीजी महाराज)-को पूर्वाभिमुख बैठाकर ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ पुंडरीकाक्षः पुनातु ३ ॥ कहकर उनपर जल छिड़के और नाई-द्वारा उनका क्षौर करावे। क्षौर हो चुकनेपर उनके मुण्डित शिरपर ॐ बनाकर—द्यौः शान्तिरन्तरिक्षठं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वठं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ यह मन्त्र पढ़कर उनके सिरपर गंगाजल छिड़के। इसके पश्चात् वेदीके ईशान कोणमें पूर्वाभिमुख बैठाकर गुरुजीको (श्रीस्वामीजीको) स्नान करावे और नवीन कौपीन, अंगवस्त्र, उपरना और स्कंधवस्त्र पहनावे। इसके पश्चात् उन्हें पूजनके मंच-पर रक्खे हुए पूजित पीठपर बैठाकर विधिपूर्वक उनकी पूजा करे।

—:०:—

वेदीक्रम

आग्नेय्यां मातृकावेदी, वास्तुवेदी च नैर्ऋते ।
वायव्यां क्षेत्रपालस्य ईशान्यां तु नवग्रहाः ॥

[आग्नेय (पूर्व-दक्षिण कोनेमें) मातृका वेदी, नैर्ऋत्य (दक्षिण-पश्चिम कोनेमें) वास्तुवेदी, वायव्य (पश्चिम-उत्तर कोनेमें) क्षेत्रपाल और ईशान (उत्तर-पूर्व कोनेमें) नवग्रहकी स्थापना करनी चाहिए।]

[कुण्डरत्नावली-कुण्डकल्पद्रुमयोष्टीकायाम्]

पूजन-सामग्री

दीपक
जलपात्र,आचमनी
गन्ध (चन्दन),कुंकुम (रोली)
मंगल-सूत्र (नारा, कलावा)
पुष्प, माला, धूप
अर्घ्य (गंध, जल, पुष्प, अक्षत)
श्वेत तिल (शालग्रामके लिये)
अक्षत,नैवेद्य
पान, सुपारी, इलायची, लौंग, कपूर
दूध, दही, घी, मधु, शक्कर
पंचामृत
गंगाजल
वस्त्र (धोती दुपट्टा)
उपवस्त्र (अँगोछा)
यज्ञोपवीत
दूर्वा (अग्रभाग केवल)
शमीपत्र (जाँटकी पत्ती)
सिन्दूर, हल्दी, काजल,अबीर-गुलाल
ऋतुफल
शंकु (कीलें) ४
पायस (खीर) बलिके लिये
कलश (७),नारियल (६),बिल्व (१)

बिल्व-पत्र (उलटकर चढ़ाना चाहिए)
सप्तधान्य(तिल जौ,उड़द चावल,गेहूँ,चना,मूँग)
सर्वौषधि
पंच-पल्लव (आम, वट, पीपल, गूलर, पलाश)
सप्तमृत्तिका (घुड़साल, हथसार, बाँबी, नदी, राजद्वार, गोशाला और चौराहेकी या केवल गोशालाकी मिट्टी)
सुपारी २५१ (बिना कटी)
पंचरत्न (मोती, मूँगा, सोना, चाँदी, ताँबा)
वस्त्र (वरुणके लिये श्वेत, देवीके लिये लाल।
पूर्ण पात्र (७) पीली सरसों, कुशा (दो प्रादेश, बालिश्त लंबी), पवित्री (दो कुश-पत्रोंकी पवित्री दाहने और तीन कुशपत्रोंकी पवित्री बाएँ हाथकी अनामिकाकी जड़में पहननेके लिये), तुलसीदल, शंख, घंटा
दधि-उड़द (बलिके लिये)
आटेके तेलके दीपक ५
मधुपर्क [घी, मधु (अधिक), दधि, जल (कम), शर्करा]
सुगन्धित तेल इत्र
शीशा
कंघा,चँवर,चन्दन,फलमाला
हवन-सामग्री
प्रोक्षणी प्रणीता, स्रुक् (स्रुवा) तथा स्रुची, स्फ्यः (वज्र)
ब्राह्मणोंके वरणके लिये धोती, अँगोछा, लोटा, आसन

परिशिष्ट

श्री १००८ स्वामी शंकराश्रमजी महाराजके पूर्वज देवरिया जनपदके करपरसिया ग्रामके निवासी सरयूपारी ब्राह्मण नागचौरी पाण्डेय थे और इसीलिये उनके परिवारवाले नागचौरी परसिया कहलाते हैं। परसियासे चलकर यह परिवार भिश्की, अतरौरा, गुलालपुर होता हुआ श्रीपट्टी आ बसा। प्राप्त वंशतालिकाके अनुसार श्रीमनोहरलालके पुत्र श्रीजोखूराम, उनके पुत्र श्रीअयोध्याप्रसाद और उनके पुत्र श्रीठाकुरदयालके श्रीमती हरवंशीसे दो पुत्र हुए। प्रथम श्रीरामस्वरूपजी (स्वामीजी) थे जिनकी पत्नी मकतूलादेवी थीं और द्वितीय पुत्र श्रीश्यामाचरण थे जिनकी पत्नीका नाम कलादेवी था। श्रीस्वामीजी अपने पुत्र भगवतीप्रसादके जन्मके पश्चात् विरक्त होकर चले गए।

विरक्त होनेके पश्चात् देहरादूनके पास चन्द्रमणि मठमें संन्यास ले चुकनेपर स्वामीजी दोराहेके नत्तां और सिब्ली गांवोंमें रहकर जब लुधियाने आए तब पहले कुछ दिन बूढ़ा नालेके उस पार चन्दूलालके बगीचेमें रहे, जहांसे पहले वे शेरशाह सूरीकी बनवाई हुई छतरीमें रहने लगे, उसके पश्चात् लाला मुन्नीलालजी ढंढा उन्हें सन् १९१४में ढंढोंके बागमें ले आए जहाँ वे सन्१९६२ तक रहे। पहले वे इस बगीचेके ईशान कोणकी एक छोटी-सी कोठरीमें रहते थे और वहीं उनका भोजन बनता था। उसके पश्चात् उनके लिये अलग कुटिया बनवा दी गई।

ढंढोंके बागके स्वामी निम्नांकित सात ढंढा—बन्धु थे— सर्वश्री मुन्नीलाल, रामलाल, प्यारेलाल, हरबंशलाल, जसवंतराय,

व्रतपाल और हंसराज। अब इस बागका नाम तपोवन हो गया है जिसका प्रबन्ध ढंढा चैरिटेबिल ट्रस्ट करता है जिसके निम्नांकित दस सदस्य हैं — श्री देवप्रकाश (अध्यक्ष), जयदेव, चमनलाल, दीपक, अजय, मंगतराय, राममूर्ति, बलराज, भीमसेन ढंढा तथा वासुदेव कपूर (मंत्री)।

इस तपोवनमें शिव–मन्दिर भी है जिसमें अनेक स्त्री-पुरुष नित्य पूजन और दंडी स्वामीजी की मूर्त्तिका दर्शन करने आते रहते हैं।

स्वामीजी महाराज लुधियानेमें कब आए, इस सम्बन्धमें कुछ १९०४ में, कुछ १९१४ में और कुछ सन् १९१८ में उनका आगमन बताते हैं। किन्तु गणनाके अनुसार वे १९०६ में ही लुधियाने आ गए थे।

* * *


MAHALIL GROUP

सिद्ध-पीठ-स्थानका मुख्य द्वार